
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥श्रीगणेशाय नमः॥ अपारभवसागरोत्तरणहेतुभूतं सदूत्सतापविषयीकृतं जगति यस्य नामामृतं।
दशास्यकुलकाननज्वलनतीव्रदावानलः स कोपि रघुनायको मम भवत्वभीष्टप्रदः॥१॥ स्वहृद्गतं वा
चि निवेशयंति ये भवंति ते सभ्यतमा विपश्चितां॥ पुरस्य हृत्स्थं गहनार्थजातं पद्यानि कुर्वे सुकरोऽप्र
सादः॥२॥ ये तु शास्त्रनिचयेषु कोविदाः संस्कृतेषु कृतजयशालिनो नराः॥ प्राकृतेषु परिनिष्ठिता न ते तन्मु
दे मम भवत्वयं श्रमः॥३॥ उत्तररामचरिते भवभूतिमहाकवेः। अप्रसिद्धं पदं यत्र तत्र यथामति विविच्यते॥४॥
प्रारिप्सितस्य ग्रंथस्याविघ्नेन परिसमाप्त्यर्थं कृतं नान्दीरूपं पूर्वगुरुनमस्कारात्मकं मंगलं सूत्रधारकर्तृत्वेनानुवा
रयति इदं कविभ्य इत्यत्र मशास्महे इति लुप्तप्रतीकं पदेनोत्तमपुरुषस्य बहुवचनेन तत्रात्मन इत्यनुशासनादस्म
द्योग उत्तमपुरुषस्य साधुत्वेनार्थाद्वयमित्यध्याहारः तथा च वयं पूर्वेभ्यो गुरुभ्यो नमो नमस्कारं कुर्मः वा
मुत्स्मरणं ते द्वीप्सा पाठे अभावात् किं तु कर्वे ऐणादिकप्रत्ययान्तमिदं यद्वा नमो वाकं नमो वयं अनुवाक वा
इति पाठे नपुंसकत्वेन तु प्रशास्महे [illegible] पदस्थानामाशासामः स्वगतत्वेन तां प्रार्थयामहे इत्यर्थः। इ
दं किमित्यपेक्षायामाह वयं पदेव तां वाचं वागधिष्ठात्रीं सरस्वतीरूपां देवतां अमृतरूपां मधुनरसव्यवाणीश

Acc. No. ~~2944~~ M. 1857

Title - (i) उत्तररामचरितटीका.
टी. अपेक्षित व्याख्यान.
(ii) उत्तररामचरित प्राकृतच्छाया.

Author - नारायण मौनी. (वाराणसी, संवत 1686)

Date - (i) शके 1786
(ii) शके 1785.

folio - 24.

Xerox - 48.

Scribe - जयकृष्ण घाटे.

उ॰टी॰
॥१॥

सारिणीत्वेन वा अमृतातासां। अमृता अमृतेति व्याख्यानाभिप्रायत्वेन वा अमृतां। आत्मनः परमात्मनः। आत्मा
देहधृतो जीवस्य भावे परमात्मनीति कोऽर्थः सच्चिदानंदस्य परब्रह्मणः अंशभूतो अहं तां विंदेम लभाम
हे इत्यात्मन्याशीः। विंदेमेति विद्लृ लाभ इत्यस्य धातोर्लिङ् परस्मैपदोत्तमपुरुषबहुवचनं। अत्रप्रग्रास्मृहे
विंदेमेत्युत्तमपुरुषस्यास्मद्योगं विना संभवेन वयमित्यस्याध्याक्षिप्तत्वेन तदनुपादानेपि न न्यूनपदत्वदो
षः। अयं च श्लोकः कविकृतमंगलाचरणरूपोपि। सूत्रधारः पठेन्नांदीं मध्यमं स्वरमाश्रितः। नां[illegible]
नांदीपदैर्द्वादशभिरष्टाभिर्वाप्यलंकृता इत्यभिधानात् सूत्रधारपठितत्वेन नांदीरूपोपि। तल्लक्षणं तु देवद्वि
जनृपादीनामाशीर्वचनपूर्विका॥ नंदस्यस्यां सुरा यस्मात्तस्मान्नांदीति कीर्त्यते॥ तथा आशीर्यत्र नमस्क्रि
याच शास्त्रिनः संकीर्तनं वस्तुनो निर्देशो गुरुसंस्तुतिर्मधुलिहामोदाय पुष्पांजलिः॥ अथ्यैर्द्वादशभिः पदै
रथ समैर्यद्वाष्टभिर्निर्मिता सद्वृत्तेन सुसंधिना च कथिता नांदीति सर्वागमे॥ अत्र समैरित्यभिधाना
च्चतुःपदा षोडशपदापि नांदी भवत्येव। अत्र श्लोकपादपदं केचित्सुप्तिङंतमथापरे। परेवांतरवाक्य
चपदमाहुर्विपश्चितः इत्यभिधानात्सुप्तिङंतपदाभिप्रायेण द्वादशपदा नमस्काराशीरूपा च इयं च

वर्तनीयतया सूत्रं प्रथमं येन सूच्यते ॥ रंगभूमिं समासाद्य सूत्रधारः स उच्यते इति लक्षणांतरं ॥

नांदीप्रपदंइथवा स्याद्द्वादशपदा ॥ नांद्यंते इति । नांद्या उक्तलक्षणाया अंते तत्समाप्त्यनंतरमित्यर्थः । सूत्रधार इ
ति । नाट्यस्य यदनुष्ठानं तत्सूत्रं स्यात्सबीजकं ॥ रंगदैवतपूजाकृत्सूत्रधार उदीरित इत्युक्तलक्षणस्य सूत्र
धारस्य समावृत्तिः स्थापको नाम नटः प्रविश्य वदतीति विशेषः । मात्तगुणेरूते सूत्रधारलक्षणं । चतुरो ना
ट्यनिष्णातोऽनेकभाषासमावृतः । नानाभाषणतत्त्वज्ञो नीतिशास्त्रार्थतत्त्ववित् । वेश्योपचारचतुरः
पोरक्षणविचक्षणः । नानागतिप्रचारज्ञो रसभावविशारदः । नाट्यप्रयोगनिपुणो नानाशिल्पकला
न्वितः । छंदोविधानतत्त्वज्ञः सर्वशास्त्रविचक्षणः । तत्तद्गीतानुगालापकलातालावधारणः । अवधाय
प्रयोक्ता च योक्तॄणामुपदेशकृत् । एवंगुणगणोपेतः सूत्रधारोऽभिधीयत इति । अत्रायं संक्षेपः । यत्र किंचि
न्नतो पादो स्यात्तां मूलप्रसारितो । वैष्णवं तत्तु निर्दिष्टं स्थानकं विष्णुदैवतमित्युक्तविष्णुदेवताकेन स्थानके
न प्रथमं प्रविष्टे सूत्रधारे निर्गते सति प्रविश्य तद्वत्परः काव्यमास्थापयेन्नट इत्यादिना निर्दिष्टः काव्या
नान्धाप र्थस्य स्थापको नाम नटः । स च दिव्यमर्त्यः सन् तद्रूपो मिश्रमन्यतरस्तयोः । सूचयेद्वस्तु बीजं वा मुखं पात्रम
थापि वेत्यभिधानात् । रंगं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः । ऋतुं कंचिदुपादाय भारतीं वृत्तिमा

॥उ॰टी॰
॥२॥

श्रयेत्। भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः। भेदैः प्ररोचना युक्तैर्वीथीप्रहसनामुखैः। इत्युक्तल
क्षणवाग्व्यापारात्मकभारतीरूपामलमतिविस्तरेणेत्यारभ्येतिप्रस्तावनाइत्यंता प्रस्तावनामवतारय
ति। अलमित्यादिना। तत्प्रणीतमिति। तेन भवभूतिना प्रणीतं रम्यकाव्यनाटकैरितिवृत्तखेनोपवर्णितं। ना
टकं चेदं। तल्लक्षणं चोक्तमात्रगुप्ताचार्यैः। प्रख्यातवस्तुविषयं धीरोदात्तादिनायकं। राजर्षिवंश्यरचि
तं तथा दिव्याश्रयान्वितं। युक्तं वृद्धविलासाद्यैर्गुणैर्नानाविभूतिभिः। नाट्यालंकरणैर्नानाभाषायुक्
पात्रसंचयैः। अंकप्रवेशाद्यैः सरभ्यरसभावसमुज्वलं। सुखदुःखोत्पत्तिकृत्। चरितं यन्महात्मनां।
इतिवृत्तकथोद्भूतं किंचिदुत्पाद्यवस्तु च। नाटकं नाम तत् स्तैयं रूपकं नाट्यवेदिभिरिति। असंहतानं
दनां दीकरत्ति। न संहता उपसंहता आनंदसूचिका नांदी एकदा द्वादशतूर्यजनिर्घोषरूपा यत्र सं तथा।
एकदा द्वादशतूर्यजनिर्घोषो नांदीति संगीतरत्नाकरः। अपत्यकृत्तिकामिति। कृत्रिमतनया। अपत्यकृ
त्तिका या च कृत्रिमा पुत्रिका भवेदिति कोशात्। किंवदंतीति। किंवदंती जनश्रुतिरित्यमरः। सभाज
यितुं। सभाजनं कर्तुं। सभाजनं संगतं प्रोक्तमिति हलायुधः। इति निष्क्रांतौ। सूत्रधारनटाविति शे
षः॥

पि

प्रस्तावनेति। तल्लक्षणंतु नटी विदूषको वापि पारिपार्श्वक एव वा। सूत्रधारेण सहिताः संलापं यत्र कुर्वते॥
आमुखंनाम तत्स्येव सा तु प्रस्तावेना मतेति। कंचुकीति। अंतःपुरचरो रक्षो विप्रो वृद्धो गुणान्वितः।
उक्तिप्रत्युक्तिकुशलः कंचुकीत्यभिधीयत इति। सोमपीथी। कृतसोमपानः। आवुत्तः भगिनीपति
रावुत्त इत्यमरः। सविता चेति। अत्र सवितेत्येकवचनेन वयमिति बहुवचनेन सूर्यापेक्षया स्वस्मि
न्महत्त्वं व्यज्यते। ननांदुरिति। ननांदा तु स्वसा पत्युरित्यमरः। भ्रांतमिति। भ्रांतं स्मृतमसंभाव्यं।
कष्ट इति। कुलधनैः कुलं धनमिव येषां ते तथा। धनस्य दुरंस्य चावश्यरक्षणीयत्वेन। तैः कष्टो ज
नः निंदादिक्षत्तिविधायित्वेन कष्टदायी लोकः अनुरंजनीयः समाधातुमेव योग्यः। न तु तर्जन
ताडनादिना भीषणीयः। तत्तस्मात्कारणात् मे मत्संबंधि अग्निमित्रं लोको त्वत्परिवादपरि-- हा यत्र
राया ग्निशुध्या स्वकमुत्तमर्थान्मया लोको क्वानुवादेन। तत्तु ते क्षमं उचितं न स वै था शुद्ध्यास्त्रे
नुवादसुखेनापि वक्तुमनुचितमिति भावः। अत्रार्थांतरन्यासः उत्तरार्द्धे। अम्मो अम्महे इति हृ
ये विस्मयद्योतनाविध्यो। उद्गृहीतेति। उद्गृहीतं धृतं कमनीयं सुंदरं कंकणं हस्तसूत्रं भूषणविशे

षो वा येन स तथेति करविशेषणं। कंकणं करभूषायां हस्तसूत्रे च शेखर इति हेमः। आर्या। सीता। मांडवी। भरतस्त्री। श्रुतकीर्तिः। शत्रुघ्नस्त्री। अपवार्य। रहस्यं कथ्यतेन्यस्य पराकृत्यापवारितमित्यपवारितलक्षणं दशरूपके। प्रकाशमिति। सर्वश्राव्यं प्रकाशं स्यादिति। मत्तनुविरलेरिति। तदाह् उज्जागरितकौतुकं ... तत्रस्वभावेन कल्पितानि ... कौतुकं। कुतूहलं कौतुकं स्यात् तदाशंसे ... मिति विश्वः। अनुष्ठिता। कुतूहलं कौ नकी अभ्यधिके। अल्पार्थे कन्। अल्पैर्विरलै ...

त्ति कुंतल विशेषणं। प्रतनवः सूक्ष्मा विरला श्वेतेत्तथा। स्थूलानां घनानां च केशानां सामुद्रिके निषिद्धत्वा

त्। मंथरा। कैकेयीदासी। इंगुदीति। इंगुदीतापसतरुरित्यमरः। शृंगवेरेति। शृंगवेरं नाम निषादा

धिपते र्गुहस्य नगरं। तुरगेति। तुरगस्याश्वमेधीयाश्वस्य विचयोन्वेषणं तेन व्यग्रा व्याकुला नृपि

लस्य महासुनेर्महसा तेजसा अमर्षात्क्रोधात्। प्लुष्टान् प्लुषदाहे इति धातोर्निष्ठांतस्य रूपं। दग्धा

दी नित्यर्थः। उद्धरत्। उद्धृतवान् उद्धारः स्वर्गप्राप्तिः तं कृतवानित्यर्थः। विराधेति। विराधनामकस्यरा

क्षसस्य संरोधः कर्तरि षष्ठी। तत्कृतः संरोधो रुधाके निरोधनमित्यर्थः। व्यंजनं तालवृंतकमित्यमरः

नीवारेति। नीवारस्तृणधान्यं तन्मुष्टेः पचनं येषां ते तथा। तन्मुष्टिपाकमात्रेणाहारवंत इत्यर्थः। अनोकहे

ति। अनोकहः कुटः शालः पलाशीद्रुद्रुमागमा इत्यमरः। परिसरेति। पर्यंतभूः परिसर इत्यमरः। मेदु

रिते ति सांद्रीकृते त्यर्थः। रात्रिरिति। रात्रिरेव व्यरंसीत् विरामं अवसानं प्राप्तवती न पुनरक्रमेणजे

त्यनेविरामं प्रापेत्यर्थः। व्यरंसीदिति रम क्रीडायामिति धातो र्विपूर्वकस्य लुङि प्रथमपुरुषैकवच

नं। व्याङ्परिभ्यो रम इति परस्मैपदं। जनस्थानेति। त्रेतायां तु जनस्थानं कल्लोनास्ति कमुच्यते ५

आत्मगतमिति। आत्मगतं स्वगतं चैकार्थकं। सर्वप्रकाशं श्रावयस्या स्श्राव्यं स्वगतं मतमिति

उ.टी.
॥७॥

इत्युपके। सर्वाश्चाव्यमित्यर्थः। प्रतिदधीति। प्रतिकृतिः प्रतीकारः। वैरशुद्धिः प्रतीकार इत्यमरः। पु
नर्विपच्यमाना। इति पाठः। स्पष्टोर्थः। पुनारपच्यमाना इति पाठे तु पुनारकृा स्यते नपच्यमानः। बहुका
लपर्यंतं पाकमुपगच्छन्नाः न तु पक्कीभूय पतनं गच्छन्निति भावः। आहृते हा धिगित्यर्थे हद्धी वी स्यात्प
दाचित्तमिति सागरः। रणरणको वियोगत्तरुरिति मालतीमाधवटीकायां जगद्धरः। औत्सुक्ये र
णरणकः स्मृत इति हलायुधः। रणरणकः शून्यालाप इति केचित्। तीर्थस्य। उपाध्यायस्य मंत्रिण
इति वा। तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमंत्रिषु। योनौ जलावतरणे इति वैजयंती। विघ्नरितं
परित्यक्तं अमर्षेण धीरत्वं यथा स्यादेवं समुक्तः। अतिविस्तारं नीतः कंठो यथा स्यादेवं। एतस्मिन्नि
ति। अनेन मये ससंध्या हारः। एतस्मिन्पंपासरसि बाष्पांभसा मश्रुजलानां बाष्पमुष्णाक्षिजलयोरिति
हैमः। परिपतनस्य पडुद्गमआरंभः स्तदंतराले तन्मध्यकाले कुवलयिनो नीलोत्पलवंतः भुवो विभागाः
संदृष्टाः। कीदृशाः। मदेन कलाः। ध्वनौ तु मधुरास्फुटे। कलो मंद्रस्तु गंभीर इत्यमरः। मधुराव्यक्त
ध्वनिमंतः ये मल्लिकाक्षा हंसविशेषाः। राजहंसास्तु ते चंचुचरणैर्लोहितैः सिताः मलिनैर्मल्लिका
क्षास्ते इत्यमरः। मल्लिकाख्या इति पाठस्तु मल्लिका इति आख्या नामयेषां ते इति रायमुकुटे व्याख्या
तः॥

पक्षेः स्वा

अंतामेरा जहंसास्तु र्धार्त्तराष्ट्राः सितेतरैः। मल्लिनैर्मल्लिकाख्याश्चकथ्यंते चरणाननैरितिहलायुधः। तेः
व्याधूतानि स्फुरद्दुरुदंडानि पुंडरीकाणि सितांभोजानि। पुंडरीकं सितांभोजमित्यमरः। येषु तेन तथा विधाः।
हनूमतः पूज्यत्वात् सत्वयोः ख्यापनाय सोपपदं नामग्रहणं। श्रीरघुनाथदुःखदग्धेनेन सकलभूलोकसं
तापस्य जातत्वसूचनाय जीवलोकस्येत्युक्तं। शिखाभाग्येन। मयूरो बर्हिणो बर्हीत्यमरः। ककुभसुरभिः। कु
कुभेर्जुनवृक्षेः सुरभिः सौरभवान्। इंद्रद्रुः ककुभोर्जुनइत्यमरः। एतस्मात्। चित्रदर्शनात्। वातायना
वर्तके। वातायनसंबंधिनि आवर्त्तेतेयत्रेत्यावर्त्तकोपवारकः। तत्र मुहूर्त्तं स विष्टो भूत्त संवेगोत्थभूत्त निद्रा
विति यावत्। विषविसर्पः। विषस्य स्थावरजंगमभेदभिन्नस्य सर्पविषादेः विसर्पः सर्वांगीणप्रसरणं।
रसायनानि। यज्जराव्याधिघ्नमनमौषधंतद्रसायनमिति धन्वंतरिः। यद्वा रसस्य हर्षस्य अयनानि
स्थानानि। रसोगंधेरसोहर्षेरसः स्वादेप्रकीर्त्तित इति विश्वः। निरूपयति। उपधानादिकमन्वेषयति।
रूपमिति। लक्ष्मीरित्यादीनि सर्वाण्येवरूपकाणि। मौक्तिकसरः मौक्तिकस्रक्। अस्याः संबंधि किं न प्रे
यः। अतिरायितं प्रियं। अपितु सर्वमेव प्रियमिति भावः। यदि परं। कादाचित्कं इत्यर्थः। विरहोवियो
गः स असह्यः। एतेन भाविविरहस्य सूचनाद्बीजमिदं। बीजं विस्तार्यनेकधेति दशरूपके तल्लक्षणाभि
धानात्। प्रतीहारी। दौवारिकी। तल्लक्षणंतु। संधिविग्रहसंबद्धनानाकार्यसमुत्थितं। निवेदयितिया

॥उ॰टी॰ अद्वैतमिति

॥५॥

कार्यप्रतीहारी तु सा मतेति मातलगुले रूकं। देवस्य पक्षीवादकथनाद्दुर्मुख इति संज्ञास्य। शुद्धान्तेति। स्त्र्यगारं
भूभुजामन्तःपुरं स्यादवरोधनं शुद्धान्तश्चावरोधश्चेत्यमरः। रणरणकः उद्वेगः शून्यालाप इति संप्रदायः
तस्य सुमानुषस्य कल्याणं भूयादित्यु व्याहारः। तत्किं। यत्सुखदुःखयोरद्वैतं एकरूपं। यत्सर्वासु अवस्था
सु अनुगुणं। संपद्विपद्रूपासु अनुकूलं। यत्र हृदयस्य विश्रामः। यस्मिन् जरसा रसः। वार्द्धकेन प्रीतिः। अ
हार्यः। यत्कालेन न्रौ न्रापोपगमेन आवरणात्ययात् लज्जाभयापेघगमात्परिणते विरूढे प्रेमसारे यत्स्थि
तं हीति निश्चयेन। एकं तत्कथमपि दैवयोगेन प्राप्यते। द्वितीयस्य तु तादृशस्य प्राप्तिसंभावना नास्त्येवे
द्वं तिभावः। यद्वा तस्य सुमानुषस्यैवं भद्रं कल्याणमर्थी प्रेमरूपं कथमपि महता क्लेशेन प्रार्थ्यते। प्राप्यते इत्यपि
पाठः। तदिति सव्ययं शेष इत्यर्थः। अहह खेदे। अहहेत्यद्भुते खेदे इति सागरः। अद्भुतैः अग्निशुध्यादिभिः। आल
र्कमिति। अलर्कस्य कुक्कुरविशेषस्येदमालर्कं। स्यादलर्कस्तु योगित इत्यमरः। योगितः ~~[illegible]~~ औषधा
दिनोन्मादं नीतं। नूतनो राजेति। नूतनराजपदाभ्यां प्रजानुरंजनमात्राग्रहवान् न तु प्रियानुरंजनाग्रह
वान् अयमिति ततोऽस्यानिदेशोऽपरिहार्य इति द्योत्यते। श्रान्तं। असंभाव्या इक्ष्वाकिति। इक्ष्वाकोर्वंशे उद्भवउ
सतिर्यस्य तस्मात्। विशुद्धिकाले। अग्निशुद्धिकाले। तत् अद्भुतं कर्म संपूर्णं शरीरया अग्निमध्ये निर्गि

मनं दशरथप्रभृतिसाक्ष्यदानं देवताप्रतिबोधनं च दूरं रतं रुक्मायां रतकः प्रसेतु विश्वसतु। नृशंसो घातुकः
क्रूर इत्यमरः। स्तौनिक इति। सूना वधस्थानमस्यास्तीति तादृशो वधाजीव इत्यर्थः। आतंके इति। आतंकेनस
तापेन स्फुरितः स्फुरणवान् कठोरो यो गर्भस्तेन गुर्वी। आतंको रुग्जिर्मूकायां संतापे मुरजध्वनाविति हेमः
अब्रह्मण्यमवध्योक्तावित्यमरः। उग्रतपसा भिस्सनेन तत्कार्यविलंबे शापादि दास्यतीति ध्वनितं। कुंभीन
सीपुत्रस्य लवणासुरस्य। कुंभीनसी जनन्यां तु लवणाख्यस्य रक्षस इति विश्वः। इति प्रथमोंकः। नेपथ्य
इति। अंतर्जवनिकाच्छन्नैश्चूलिकार्थस्य सूचनमिति नेपथ्यपात्रेण वासंतिक्या वनदेवतया आत्रेय्या
स्तापस्याः प्रवेशसूचना चूलिकेयं। यद्यप्यारण्यकेषु परिग्रहात्स्वत्वमिति यथेच्छं लाघुक्तौ प्रयोजनाभा
वः तथापि स्वस्य वनदेवतात्वख्यापनाय वने मम स्वत्वं वर्तत इति द्योतयितुं यथेच्छं लाघुक्तं। निगमांतवि
द्यां। उपनिषद्विद्यां। प्रत्यूहः विघ्नः। विघ्नोऽन्तरायः प्रत्यूहः इत्यमरः। दारकद्वयं। बालकद्वयं। परिनिष्ठापि
ताः। ग्रहणपर्यंतं पाठिताः। त्रयीति। वेदत्रयी विद्या। स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी इ
त्यमरः। शुचिरिति। अच्छः स्वच्छ इत्यर्थः। मणिर्हीरकादिः। बिंबोद्ग्राहे। बिंबस्य मनुष्यादिरूपस्य
उद्ग्राहे प्रतिफलने। प्रति॰ बिंबधारण इति यावत्। प्रभवति समर्थो भवति। मृदो मृत्तिकानां

वयः सम्भृतेन। शुचिः शुद्धेऽनुपहते शृंगारे षाढयोरपीति विश्वलोचनः। अगमदिति माङः पृथगेवेति नमा
स्योगे इति अडागमनिषेधो न प्रवर्त्तते। अगमदिति अवधीरिति च लुङ् परस्मैपदमध्यमपुरुषैकवच
नं। आम्नायात्। वेदात्। प्रातिभमिति। प्रस्तानवनवोल्लासशालिनी प्रतिभा मतेति। साधनान्वितः। सा
धनेन सैन्येनान्वितः। साधनं कारणे सैन्ये निर्वृत्तिगतिसिद्धिषु इति विश्वलोचनः। कुड्मलेति। कूलेतीरे
कूले रोधश्च तीरं च इत्यमरः। आधारे सप्तमी। कुलायद्रुमाः कुलायानां नीडानां संबंधिनो द्रुमाः। कुला
यो नीडमस्त्रियामित्यमरः। स्वकुसुमैः स्वीयैः पुष्पैः गोदावरीं अर्चन्ति पूजयन्ति। कीदृशैः स्वकुसुमैः
घर्मेण उष्णेन स्रस्तानि श्लथीकृतानि बंधनानि वृन्तानि येषां तैः। अत एव कंडूलाः कंडूयुक्ता ये
द्विपगंडपिंडाः तेषां यत्कर्षणं घर्षणं तेन यः उत्कृष्टः कंपः तेन संपतनशीलानि संपातीनि तैः। कीदृशा द्रु
माः। छायायामपस्किरमाणाः नखैरालिखमानाः अपाच्चतुष्पाच्छकुनिष्वालेखने इत्यपात्स्करस्य
किरतेः सुट्। विष्किराः पतत्रयः विष्किरः शकुनौ वेति निपातितः। तैः सुखेन शुद्धा व्यावृष्टकीटास्तच्चोपे
षां तेत तथा। नगौकोवाजिविकिरविविष्किरपतत्रयः इत्यमरः। यद्वा छायायां अपः जलानि किरमाणा।
मुंचतः अतिशीतलच्छाया इत्यर्थः। तथा विधाश्चते वि ष्किर सुखव्यावृष्टकीटत्वं चश्चते तथा। अपः

क्रियमाणा इत्यलुक्समासः। पूर्वव्याख्यानेच्छायापदमनर्थकमेवापुनः कीदृशाः। कूजंति शब्दायमानानि
कुंतानि मनोहराणि कपोतानां पारावतानां कुक्कुभानां पक्षिविशेषाणां च कुलानि समूहा येषु ते तथा। पा
रावतः कलरवः कपोत इत्यमरः। तित्तिरिः कुक्कुभो लावो जीवंजीवश्चकोरक इत्यमरशेषः पक्षिविशेषा
एकेकनामान अभिहिताः। इति निष्क्रांते। आत्रेयी वासंत्यो रंगमध्यान्नेपथ्यमध्यगते। विष्कंभकं इ
ति। तल्लक्षणं तु दशरूपके। वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः। विष्कंभकः स विज्ञेयो मध्यपात्र
प्रयोजितः येषामिति वृत्तवर्णनीयत्तानि उत्तमपात्राणि। नीचानि चेट्यादीनि तदन्यानि मध्यानि। अत्र
मध्यपात्रेण मध्यपात्राभ्यां वा प्रयोजित इति व्याख्याय शुद्धमिश्रादिभेदाः प्रदर्शिता विष्कंभकस्य ते तत्र
त्रैव द्रष्टव्याः। जीवातवे। जीवनोपायाय। जीवातुर्जीवनौषध्यमित्यमरः। द्वयं। ब्राह्मणपुत्रजीवनं शूद्र
कर्तृकश्च। युष्मत्प्रसादप्रसादनमुपायः साधनं यस्य स तथा। एष महिमा। दिव्यदेहप्राप्त्यादिरूपः। वृषलः श
शूद्रः। आभोगः पूर्णता। विस्तार इति यावत्। आभोगो वरुणच्छत्रे पूर्णतायत्नयोरपीति विश्वः। कुंः कू
जस्ति मिता इति। ताः सीमानः पर्यंतभूमयः संति। सीमसीमे स्त्रियामुभे इत्यमरः। ताः का[illegible]यासु
सीमसु अयं अजगराणां मय स्वेदस्य घर्मांबुनः द्रवः निष्यंदः तृष्यद्भिः जलाभिलाषावद्भिः प्रतिसू
र्यकैः सरटैः। सरटः कृकलासः स्यात्प्रति सूर्यशयानक इति हलायुधः। पीयते। आचम्यते। की
दृशेति। शूद्रोऽपि एवं दिव्यत्वं प्राप्तः। पापकारिणो राजदंडिताः शुध्यंतीत्यागमः। १५

॥उ॰टी॰
॥७॥

दस्यः सीमानः । क्वचित्कस्मिंश्चित्प्रदेशे निष्कूजैः कूजनाभावे रथीं पक्षिषु शब्दाभावे स्तिमिताम् । काद्रवसेमि
त्यवत्सः । क्वचिदपि प्रदेशे प्रांतरे प्रोच्चंडा अतिशयिताः सत्वानां प्राणिनां सिंहप्रभृतीनां स्वनः शब्दो यासु
ताः । स्वेच्छया सुप्ताः गभीरघोरत्तः निद्राकालीनश्वासवंतो ये उरगाः सर्पाः तेषां श्वासैः प्रदीप्ता अ
ग्नयो यासु ताः । प्रदराः श्वभ्राणि तेषामुदरेषु मध्यभागेषु विलसंति स्वल्पानि अंभांसि यासु ताः । प्रद
रस्त्रीरुजो भेदे प्रदरः श्वभ्रभीतयोरिति विश्वलोचनः । प्रिय आरामो यस्याः सा प्रियारामा । कांताराणि ।
वनानि । कांतारमुपसर्गादौ वने दुर्गमवर्त्मनीति विश्वः । त्वयेति । अहं त्वया सह मधुगंधिषु वनेषु निवत्स्या
मि । निवत्स्यामि । अव्ययानामनेकार्थत्वादितीवेत्यत्रैव कार एवमर्थकः । तथा च इत्येवमेवमर्थकशब्दप्रयो
गमात्रेणापि असौ सीता आरमतीव । क्रीडां करोतीव । निवत्स्यामीति भविष्यदर्थकशब्दप्रयोगे सहवा
सरूपकारणस्यांतरभावित्वं आरमतीवेति वर्तमानार्थकशब्दप्रयोगेण क्रीडारूपकार्यस्य पूर्वभावि
त्वं । तेनातिशयोक्तिरियं । कार्यकारणयोश्चैव पौर्वापर्यव्यतिक्रमः । विज्ञेयातिशयोक्तिः सेति लक्ष
णात् । सत्तस्याः स्नेहः तादृशः अनिर्वाच्यो न । त्वीदृशस्याकारकशब्दाभिलाप्य इत्यर्थः । दृढेति । दृढ एते
षु मध्यमारण्येषु समदैः शकुंतैः पक्षिभिः । शकुंतिपक्षिशकुनिशकुंतशकुनद्विजा इत्यमरः । आक्रांताया
वानीरवीरुधो वेतसलताश्च । अथवेतसे रथाभ्रपुष्पविदुलशीतवानीरवंजुला इत्यमरः । लता प्रता

तत्र

मतानि नीवीरुदित्यमरः। तासां ये प्रसवाः पुष्पफलमूलानि तैः सुरभीणि सुगंधीनि गृहीतानि स्वच्छानि निर्म
लानि तोयानि जलानि यासां ताः। फलभरेण फलसमूहानां यः परिणामः पक्वता तया श्यामा ये जंबुनि
कुंजाः जंबूः स्त्री जंबु जांबवमित्य° निकुंजकुंजौ वा क्लीबे लतादिपिहितोदरे इत्य° तेषु यत्स्खलनं जल
संघर्षः तेन मुखराणि श्यामायमानानि निर्झरीणि विशालानि स्रोतांसि प्रवाहा यासां ताः॥ दधती
ति। अत्रास्मिन्प्रदेशे कुहराणि बिलानि। अथ कुहरं सुषिरं विवरं बिलमित्य° तानि भजंते सेवंते इति तथा
तेषां भल्लूकयूनां ऋक्षतरुणानां अनुरसितेन प्रतिध्वनिना गुरूणि बहुलानि अंबूकृतानि सनिष्ठीवना
नि वचनानि। अंबूकृतं सनिष्ठीवमित्य° स्त्यानं घनत्वं विस्तर इति यावत्। स्त्यानं स्निग्धे प्रतिध्वाने घ
नत्वालस्ययोरपीति विश्वः॥ सल्लकीनां गजप्रियाणां वृक्षविशेषाणां शिशिरः शीतलः कटुश्च क
षायः स्वरसः निर्यास इति यावत्। कषायोऽस्त्री रसभेदे स्यादंगरागे विलेपने इति विश्वः। स्त्यायते वृद्धिं
प्राप्नोति। कीदृशः। दरभेदैः दलिता विदलिताः अत एव विकीर्णाः इतस्ततः पर्यस्ता ये ग्रंथयः प्रदेशा विशे
षाः अर्थात्सल्लकीनामेव तेषां यो निष्यंदः रसक्षरणं तस्य गंधः आमोदः संबध्नाति यस्मिन्स तथा।
गंधो गंधक आमोदे लेशे संबंधगर्वयोरिति विश्वः ५ वसंतः प्रियासंस्तुतवंतः। रसज्ञाः आस्वादज्ञाः

रसः स्यादेव कीर्त्तितः इति विश्वः। एते। समीपतरवर्त्तिनः। समीपतरवर्त्ति चैतदो रूपमित्युक्तत्वात्। तएव तान्येवेत्यत्र
चतच्छब्दः पूर्वानुभूतवाची। तदिति परोक्षे विजानीयादिति। आमंजुवंजुललतानि चेत्यत्र चकारो व्यवहितानां
मपि वनस्थलीसरिज्जटानां समुच्चयार्थः। आमंजवः अतिमनोहराः वंजुलाः अशोकाः लताश्च। वंजुलो ऽशो
क इत्यमरः। वानीरे वंजुलः प्रोक्तो विदुलो वेतसः स्मृत इति हलायुधः। येषु ता येषु तानि वनस्थलानीत्यस्य वि
शेषणं। निचितानीति पाठे लताभिः व्याप्तानि। नीरंध्रारंध्रशून्या कृतिघना इति यावत्। नीलाः सजलमेघे
श्यामवर्त्तित्वेनातिसरसपल्लवत्वेन श्यामा निचुला वेतसाकारा वृक्षविशेषाः। अमूनि। विप्रकृष्टानि। अदसस्तु
विप्रकृष्टे ऽस्त्युक्तत्वात्। गृध्रराजस्य। जटायोः। पयसीति सामीप्यसप्तमी। कीदृशो वनांतः। विनताः पुष्पफ
लादिनातिनम्राः विततां इति पाठे विस्तृताः श्यामलाः श्यामाः सुंदरा वा। श्यामलो मेचके स्वच्छे कोम
ले मृदुले ऽज्वले इति विश्वः। यस्यां पंचवट्यां। अगस्त्यस्य अयनं स्थानं अयनं येषां ते। अगस्त्याश्रमवासि
न इत्यर्थः। गुंजदिति। अयं गिरिः क्रौंचावतः तन्नामकः तं हे देव पश्य र इति चूर्णिकयान्वयः। कीदृशो गि

रिः। गुंजंतः शब्दायमाना ये कुंजकुटीरेषु कुंजरूपाल्पकुटीषु। कुटीशमीशुंडाभ्यो र इति अल्पार्थे रः। कौ
शिकाः उलूकाः उलूकः कौशिकः प्रोक्तो ध्वांक्षाराति निशाटन इति हलायुधः। तेषां या घटाः समूहा

स्तासां ये घूत्काराः शब्दविशेषाः वर्णात्कार इति। घूघूइत्येवमादिशब्दा इतियावत्। तद्वंतः तत्संवर्द्धिता
ये कीचकस्तंबानां सच्छिद्रवेणुगुल्मानां। कीचका वेणवस्ते स्युर्ये स्वनंत्यनिलोद्धताः इत्य० अमरकां
डे स्तंबगुल्मो विरुप० वेणूनां शाखाभावेनाप्रकांडत्वात्तत्झिटिकानां स्तंबत्वेन निर्देशः। आडंबराः
शब्दविशेषप्रपंचाः। आडंबरो गजानां पटहे स्वे गर्जिते प्रपंचे चेति हलायुधः। तैः कृतामूकानि निःशब्दा
नि मौकुलीनां कृष्णकाकानां कुलानि समूहा यस्मिन्स तथा। काकोलो मौकलिर्द्रोणः कृष्णकाकोव
नाश्रय इति हला०। एकदृष्टिश्चिरंजीवी मौकुलिर्द्धिकश्चेति क्षीरस्वामी। एतस्मिन् गिरौ प्रचलतामि
तस्ततो धावतां प्रचलाकिनां प्रचलाकः शिखंडः। स येषामस्ति ते प्रचलाकिनो मयूराः। प्रचलाकः
शिखंडश्चेति हला० केकी शिखी शिखंडी प्रचलाकी बर्हिणः कलापीचेति हला० तेषां कूजितैः श
ब्दितैः उद्वेजिताः उद्वेगं प्रापिताः सतः पुराणानां जीर्णानां। सो गंध्यातिशयद्योतनाय पुराणे
ति। रोहिणतरूणां चंदनद्रुमाणां। रोहिणश्चंदनद्रुम इति हारावली। ये स्कंधाः प्रकांडाः। अस्त्री
प्रकांडः स्कंधः स्यान्मूलाच्छाखावधिस्तरोरित्यम० तेषु आधारे सप्तमी। तेषु स्थिता इतियावत्

।२॰ टी॰
॥९॥

कुंभीनसाः सर्पाः। दर्वीकरो विषधरः श्वसनाशनोऽहिः। चक्री फणाधरो विषायुधदीर्घपृष्ठाः। कुंभीनसद्विरसनौ समकोटरस्थितिर्गोकर्णकुंडलिलुलत्तरसना विषास्या इति हारावली। कुंभीनसो विषज्वालाकुलदृष्टिर्विहंगमे इति विश्वः। उद्वेल्लंति। इतस्ततः प्रचरंति। ननु चंदनं स्वं द्रुतापलायंते पलायनकारणे हि भुजगकूजितजन्योद्वेगे विद्यमानेऽपि तत्कार्यस्य पलायनस्याभावाद्विशेषोक्तिरलंकारः। एते तत इति। एते दक्षिणा दक्षिणदिग्अवस्थिताः क्षोणीभृतः पर्वताः ते पूर्वानुभूताः। कीदृशाः। कुहरेषु बिलेषु गद्गदा इव नदं अव्यक्तवाच इव नदंति। शब्दायमाना निर्गोदावरीवारीणि येषु ते। मेघे रम्भे राकुलं वितं मौली निजक्रांतपरभागा निनीलशिखराणि येषां ते तथा। इमा गभीराणि दुर्विगाहाणि पयांसि जलानि येषु ताः पुण्याः सरित्संगमास्ताः। कीदृशाः। अन्योन्यप्रतिघातेन परस्परप्रतिरोधेन संकुलं संकटं चलंतो ये कल्लोला महातरंगास्तेषां कोलाहलेन उपलक्षिताः। पुनः कीदृशाः। उत्तालाः त्वरिताः। उत्तालस्त्वरितो स्यादिति हलाः वेगवंत इत्यर्थः।
इति टीकायां द्वितीयोंकः॥ २०॥

अनिर्भिन्नेति। रामस्य करुणो रसः। यतः अनिर्भिन्नो गभीरत्वान्न निर्भिन्नं प्रकटीकृतं तद्गभीरत्वं परासंवेद्य
त्वं च तत्तथा तस्मात्। अन्यं प्रस्वेदनादिति यावत्। अंतर्गूढघनातिशयिता व्यथा यस्य तथा। अतः पुटपा
कप्रतीकाशः अंतस्तद्रवस्थस्य कूष्मांडादेर्बहिर्मृल्लेपादिना पाकः क्रियते तत्प्रतीकाशं तत्तुल्यः। मौलिक इति
मूलादागतो मौलिको जानकीलक्षण इत्यर्थः। अभ्युपपन्ना अनुगृहीता। अभ्युपपत्तिरनुग्रहः। स्तनयित्नोः। मेघस्य।
स्तनयित्नुर्बलाहक इति अमरः। उत्पीडः समूहः। ससंभ्रमं। सादरं। संभ्रमस्त्वादरे भये इति विश्वः। इंदोः कराः
किरणाः कंदला इव नवांकुरा इवाकंदलं तु नवांकुरमिति धरणिः। आतप्तयोः अभिव्याप्य तप्तयोः जीवितम
नसोः परितर्पणः तृप्तिजनकः। ओं इत्यंगीकारे। समन्युगद्गदं। सदैन्याव्यक्तवचनं। मन्युर्दैन्ये क्रतौ क्रोधे इ
ति हलायुधः। निरनुक्रोशा। निर्दया। अनुक्रोशः कृपा रुदन्त्यस्याश्च करुणा घृणेति हलायुधः। दर्शितो स्ने
हसंभारः दर्शितस्नेहसमूहः। संभारः संभृतौ गणे इति विश्वः। अनरालः अवक्रः। स्यादरालः पुमान्सर्जे मत्ते
भे कुटिलेऽन्यवदिति विश्वः। चूर्णिकाः आमनुशिक्षितमिति पाठे नर्धृत्तमिति पीका धृत्तमेवेत्यर्थः। अहं शि
क्षितमिति पाठे तु यथाश्रुतमेव॥ अनुबद्धा संबद्धा आलपवती मुग्धा सुंदरा काकली विहसितेन यत्र। काकली तु
कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे इत्यः। प्रसवः अपत्यजाते। स्नेहस्य प्रकर्षपर्यंतः प्रकर्षावधिः। एतेन अ

॥उ॰टी॰
॥१०५

विलुलितं

पन्यजातं पित्रोः परमुत्कृष्टं। अन्योन्यसंश्लेषणं। अन्योन्यसंश्लेषरूपं। अतरणः न विद्यते तरणो यस्मादेता दृशो यो
मदः। अभिमिषिति। अहं वत्सलेन स्निग्धेन मनसा त्वां स्मरामि। कीदृशं मुग्धया सुंदर्या सीतया नर्त्यमानं करकिसलय
तालैः कारितनृत्यं। कीदृश्या मुग्धया। भ्रमिषु अर्थान्नवभ्रमणेषु प्रचलिते तिचंचले चतुरे चातुर्ययुक्ते ये भ्रुवौ तयो
स्तांडवैः नृत्याकारेण चालनैः कृत्वा वृतपुटं छत्र किंचित्संकोचं अंतर्मंडले मध्यभागे आवृत्तं विपरिवर्तमानं यच्चे
क्षुः तत्कर्मीभूतं मंडयंत्या नृत्ये भयं त्यांकमिव पुत्रमिव॥ देव्याः स्मरति। देवीं स्मरतीत्यर्थः। यतः अत्र कादंबे स्वजन
नइव स्वीयबांधवजन इव प्रमोदं हर्षं एति प्राप्नोति। मुत्प्रीतिः प्रमदो हर्ष इत्य॰ अतिपूरैः अतिशयितैः प्रवाहैः संबद्ध ५
शकुंतयः। पाक्षिणः। अंबुनीवारशष्पैरिति तरुशकुनिकुरंगानित्यनेन यथासंख्यं संबध्यते॥ उत्तरेण। एतदपेक्षया
अधिकोत्कृष्टेनेन अधिकतरेति रामस्य संबुद्धिः। सांप्रतिके। युक्तं। पूरोत्पीडे इति। तडागस्य पूरोत्पीडे पूरस्य प्रवा
हस्य मध्यवर्तिनो जलस्येत्यर्थः उत्पीडे अत्यंताधिक्ये परीवाहः। जलनिःसरणमार्गः प्रतिक्रिया इति दृष्टांत
मुखेनोक्तं। पूरस्य जलप्रतिबंधार्थं बद्धस्य सेतोः उत्पीडेन जलाधिक्येन पातनेपरीवाहः प्रतिक्रिया। जलर
क्षणार्थं प्रतीकार इत्यर्थ इति केचित्। अत्र शोकक्षोभे इत्यादि दार्ष्टांतिकमुक्त्वा पूरोत्पीडे इत्यादि दृष्टांतोपादान
युक्तमित्याभाति। अन्यारण्योरस्माभिः द्रष्टव्यं ते। यत् अद्यापि पुनः परिवादभीत्या सीतापरित्यागे कृते पित्र

सीदत। सपरिवादोऽस्माभिरस्तानात्स्तुत इति प्रसन्नो भव तात। यद्वा उद्घाप्यास्मिन्काले लोकमध्ये एवं एवंजाती-
यकविषये संततिअशरणैः प्राणिभिः दुःखं दृश्यते यतः प्रसीद तात तथा च तत्तुल्यत्वयामयापि दृश्यत इति भा-
वः तेन मामित्येकवचनेन स्वनिर्देशं कृत्वा अशरणैरिति बहुवचनेन निर्देशोऽपि नानुपपन्नः। अस्तु वा चित्तव्या-
क्षेपेण पूर्वव्याख्याने पि बहुवचननिर्देशः। अवगूरणं। अवक्षारणं। यथेति। अंतःशरीरस्य मध्ये तिरश्ची-
नं अलातशल्यं अलातस्य सौ ग्नेर्लोहादेः शल्यं स विषश्चूर्णशः मर्माणि कृंतति तथा हृद्वित्तीक्ष्णः शोकशंकु-
मर्माणि कृंतत न पि किंसूप्या सोढो न अपि तु सोढ एवेत्यर्थः। प्रसंस्तुतेति संस्तुतानि बहुतरप्रियाणि। संस्त-
वः स्यात्परिचय इत्यमरः। ते चंद्रशोनाक्षलोकनात्। लोलेति लोलं चंचलं तत्कारेक्षयव ... इत्यर्थः एतादृ-
शं च ततः लोलस्य अतिशायितस्य क्षुभितस्य क्षोभो दुःखविशेषः तद्युतस्य करुणस्य करुणरसस्थायीभा-
वस्य शोकस्य यदुज्जृंभणं अतिशायिता वृद्धिः तस्य स्तंभनार्थं [illegible] प्रतिबंधा-
र्थं मया योऽयो यत्नः अंतः आधीयते। तं कोऽपि चेतो विकारः बलाद्विस्वादृशस्येव प्रसरति। तोयस्य अ-
प्रतिहतरयः ओघः सैकतं सिकतामयं सेतुमिव। आक्षिपामि। व्यासंगांतरं करोमि। अतिप्रलापैः अ-
तिनिरर्थकालापैः। प्रलापोऽनर्थकं वचः इत्यमरः। [illegible] इति तं सुंदरं यल्लुवल्यां [illegible] विश्लेषस्य कंदलेन वाकु-

हर्फरेवडी

७.६।
९९

ः तन्निभः तत्तुल्यः। परवान् पराधीनः। परतंत्रः पराधीनः परवान्नाथवानपीत्य०। स्फुटकोरका। विकसि
तकलिका। प्रफुल्लोत्फुल्लसंफुल्लव्याकोचविकचस्फुटाः। फुल्लश्चैते विकसिते स्यु०। कलिका कोरकः पुमानित्य०।
अभिषंग इति। संसर्ग इत्यर्थः। अभिषंगस्तु संसर्गे न्यूपथाक्रोशनेगजन इति विश्वः। अतिभूमिं गतविप्र
लंभा अतिशयितविरहाः। भूमिं गतविप्रलंभा। अतिभूमिंगते सलुग्रसमासः। व्यक्तमिति सर्वथेत्यर्थः। भग
वान् माहात्म्यवान् ऐश्वर्यवान्वा। भगं तु ज्ञानयोनीच्छायत्नो माहात्म्य सुतिषु। ऐश्वर्यवीर्य वैराग्य धर्म
श्रीयशोभानुषु इति विश्वः। अनेकवारं बहुधा परिकल्पितैः मनोरथपथानीतैः तेसाणिस्वप्नादिभिः
निर्मितः उत्पादितः। विमर्शः हस्ताकर्षणं तर्धानादिभिः प्रतारितः। कार्ष्णायसः लोहमयः। क
कालश्रेणाः अस्थिपंजरशेषाः। स्यादस्थिरास्थिकं कालस्य०। पक्षतिः पक्षमूलं स्त्री पक्षतिः पक्षमू
लमित्य०। इतोस्मात्प्रदेशात्। उद्वलंती पातित्रसे नदीसंदेहं गुणोकाग्निनावासंतत्सशरीरं सीतां वह
न्नरिः रावणः धामाकाशमस्युदस्थात्। तत्तत्त्वनिवात्। मन्योः क्रोधस्य विषयः। अप्रतिविधः
प्रतिविधा प्रतीकारः तद्रहितः। पत्रिणां बाणानां। पत्री रोपइषुर्द्वयोरित्य०। तेनापि तस्या हिरण्म
य्यां सीतायामपि। तमसा वासं यो सीतारामौ प्रतीतिय यथासंख्यं। अवनिः पृथ्वी। आयच्छ दसोमा

ऽक्रियत इति वृत्तस्य नीरसत्वेन सूच्यत्वमभिप्रेत्य विष्कंभकेन तद्दर्शयति॥ ततइति। नीवारेति। तपोवनम्
गः नीवारौदनस्य तृणधान्योदनस्य नीवारस्तृणधान्यं स्यादित्य॰ मंडं पर्याप्तं यथा स्यात्तथा आचामतीति
पिबति। पर्याप्तमिति मंडविशेषणं वा। क्षुत्पिपासानिवृत्तिक्षममित्यर्थः। कीदृशं मंडं। उष्णं मधुरं। उ
ष्णश्चासौ मधुरश्चेति। पुनः कीदृशं। सद्यः प्रसूता चासौ प्रिया च तस्याः पीतं पानं तस्मादभ्यधिके उ
दीरितमिति यावत्। पीतादभ्यधिकमित्यनेन पशुनापि मृगेणास्य क्षुत्पिपासयोर्विद्यमानयोरपि
प्रियायाः सद्यःप्रसूतत्वेन स्नेहवशाच्चात्तया मंडपानं प्रथमतः कारितं पश्चात्स्वयं कृतमिति द्योत्य
ते। सद्यःप्रसूते त्वत्र पुंवत्कर्मधारयेत्यादिना पुंवत्। अप्रियादिष्विति निषेधस्तु स्त्रियाः पुंवदित्य
स्यैव ५ किंच सर्पिष्मतः प्रशस्तघृतयुक्तस्य भक्तस्य ओदनस्य गंधेन सौरभेणाकर्त्री। कंकंधूर्बदरी तस्याः
फलैः मिश्रा ये शाकाः तेषां पचनस्य पाकस्य आमोदः अतिदूरगामी अतिमनोहरो वा गंधः विमर्दो
त्थे परिमलो गंधे जनमनोहरे आमोदः सोऽतिनिर्हारीत्य॰ कर्मैपरिकीर्त्यते। पारिस्त्ततो विस्तृतः सर्व
तः प्रसृत इति यावत् क्रियते। कीदृशः आमोदः मनाक् अतुस्ततः पाकशालातो बहिर्निर्गतः दृष
न्निः सततः शाकपचनामोदः स घस्तत्सगो घृतमिश्रौदनगंधेन संवलितः सन् विरुद्धः पारेतः

॥१२५
उ०टी०

प्रसृतः क्रियत इति भावः। प्राचेतसस्तु भक्तस्य गंधेन मनागनुसृत इति मृगविशेषणं परिसृतीयेत इत्यस्य कर्म
प्रत्ययांतत्वे कर्तरि राध्याहारः कर्मप्रत्ययांतत्वे प्रसृतो भवतीति व्याचक्षते। कल्लोडिकेति वत्सतर्यां मदम
डायितेति भक्षणे देशी। एवं कल्लसा वत्सतरी इति वासनरूपं॥ वैखानसो वानप्रस्थ इति हलायुधः। प्राचे
तसस्तु वाल्मीकिरिति हलाः अमरस्य इति। ककचेनेव कृन्तन्निव मर्माणि कृन्तन्नपि मे मम मन्युः क्रोधः
न विरमति अवसानेन न प्राप्नोति। कीदृशो मन्युः अपत्ये सीतायां यत्तादृक् दुरितं दुःखं गरदनिर्वासनादि वन
वासांतं अभवत् जातं महता तीव्रेण च तेन दुरितेन विषक्तः विशेषेण सक्तः संबद्धः समुत्पन्न इति यावत्
कीदृशेन तेन। व्रणितहृदयेन। अत एव व्यथयता। पुनः कीदृशो मन्युः पटुः समर्थः। व्यासंगांतरेणापि
दूरीकर्तुमशक्यः। ध्यानवाही। संतानरूपेण निरंतरमवस्थितः तथा चिरेणापि बहुकालातिक्रमे
णापि न वदइव अभिनवो सन्नेव ध परा करिति तपश्चांद्रायणादेस्याद्कर्मे ल्लोकांतरेपि चेति विश्वः। पप
राकलक्षणमुक्तं याज्ञवल्क्येन। द्वादशाहोपवासेन पराकः परिकीर्तित इति। सांतपनस्य कृच्छ्रस्य सां
पनम हासांतपनपति सांतपनादिभेदभिन्नस्य लक्षणानि धर्मशास्त्रे प्रदर्शितानि प्रभृतिशब्द
ग्राह्याणां कृच्छ्रातिकृच्छ्र पाककृच्छ्रतादीनां लक्षणानि तत्रैव द्रष्टव्यानि तत्रैकं कृच्छ्रसांतपनस्य लु

क्षणं जाबालोक्तं प्रदर्श्यते। गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं॥ एकैकं प्रत्यहं पीत्वा त्वहोरात्रमभोजनं
कृच्छ्रः सांतपनो नाम सर्वपापप्रणाशन इति। प्रत्यग्रमहत्त्व। नूतन इत्व। प्रत्यग्रो नूतनो नव्य इत्य०। देवयजनं
यज्ञभूमिः। विराजंति शोभमानानि कतिपयकोमलदंताए वकुड्मलाग्राणि यत्र तत्तथा॥ कुड्मलो
मुकुलोऽस्त्रियामित्यम०। अतिबाल्येन सर्वेषां दंतानामनिर्गमात् कतिपयेत्युक्तं॥ वदनकमलकमित्य
ल्पार्थे कन्। वाक् वाणी उपनिषद्रूपा विद्यामात्मज्ञानरूपामिव। गृहिणा कंचुकिना। कर्दवनहा कंठे
दुःखाविष्टा वेलोक्तरीतिः। एवमादैववशेन दुरदृष्टवशेन दुःखात्मकं दुःखस्वरूपं किमपि दज्ञारथमदि
षीत्यादिरूपेणासंभाव्यं अन्यदिव भूतं प्राणिजातं जाता। अहो इत्याश्चर्ये विपाकः जात्यायुर्भोगल
क्षणत्रिविधः धर्माधर्मे विपाकमध्येऽर्थाद्भोगलक्षणो विपाको स्यादित्यर्थः लभ्यं। उषसं प्रातःसं
ध्यां॥ उषः प्रभाते संध्यायामिति विश्वः। प्रजापालस्येत्यनेन लोकानुरंजनमात्रमस्योद्देश्यं न तु यु
क्तायुक्तविचार इति ध्वनितं। ततः सर्वबीजं सीतारूपं मप्यपहृत्तमिति लिंगव्यत्यासेन योज्यं॥
मृषोद्यं मृषावचनं। विभुत्ता अनर्थिका। सावष्टंभमुत्फुल्ललिते: अवष्टंभेन संरंभेण सुष्ठुतया।
चांचल्याभावेन वा सह वर्तमानानि॥ अवष्टंभस्तु कांचने संरंभारंभयोः स्तंभे इति हेमः। मुक्त्व

१८॥
कु.टी.

मुग्धानि सुंदराणि ललितानि विलासयुक्तानि तैः। सभाजयन्। संगमयन्। संभाजने संगतं प्रोक्तमिति
हला। प्रवयसः वृद्धाः। प्रवयाः स्थविरो वृद्धो जरन्। निर्माणस्य। आकारविशेषस्य यत्राकृतिस्तत्र
गुणा वसंतीत्युक्तत्वात्। निर्मितमिति भुक्तं गच्छेः। कंचुकिनो वचनेयेन सतथा। दारकाः बालकाः। प्रस
तः प्रचलितः। महिम्नामिति। एतस्मिन् बालके विनयशिक्षतामोघ्यैर्मसृणः सर्वहृदयंगमः महि
म्नां माहात्म्यानां योतिशयः स विदग्धैरतिको विदैर्निग्राह्यः बोद्धुं शक्यः अविदग्धैर्न निग्राह्य
स्यनुषज्यते। बलवान् समर्थः संमोहः संमोहयतीति संमोहो यं बालस्य स्थिरमपि वेदांतश्र
वणादिना विषयपराङ्मुखमपि मे मनः हरत्येव स्वप्रवणं करोत्येव। यद्वा तत्स्थापरिलघुरति
स्वल्पः अयस्कांतस्य लोहकांतपाषाणस्य शकलः खंडः अयो लोहरूपो धातुः। संमोहः ए
तद्दर्शनजन्यो व्यामोह इति व्याख्याने तु दृष्टांते परिलघुरिति पदमनर्थकमेव स्यात्। एतद्व्याख्या
ने तु [illegible]तमेहिम्ना दार्ष्टांतिकेपि परिलघुता व्यज्यते। संमोहस्थिरमिति विसर्गरहितः पा
ठः क्वचित्। तत्रैतस्मिन्नतिशयः संमोहस्थिरमपि मे मनोहरत्येवेति व्याख्येयं। एतत्पाठेपि
परिलघुरिति पदमनर्थकमेव। उत्पथे अपथे पारिप्लवं चंचलं लोवेनो समति विरहं सीतापरिला

तत्पवादादि। झटितिशीघ्रं। स्रगितिइतिपाठेप्ययमर्थः। एतद्दितिापरिभूतानांपरेभ्यःपराभवंप्राप्तानां
मनस्विनांदुःखदुरदृष्टफलमितिजानतामित्यर्थः। एतत्त्वेशसवज्रघोरपतनंपरोक्षापवादादिज
न्यदुःखानुभवइतियावत्। प्रायश्चित्तं। प्रायःपापंविजानीयाच्चित्तंतस्यविशोधनमित्युक्तलक्ष
र्णा। तथाचजन्मान्तरीयपापनिवर्तकत्वेनदुःखानुभवस्यतत्प्रयोजकेषुकोपोनास्त्येवतमुचितइति
भावः॥ अतःकारणात्हेराजन्रामः अपत्यंपुत्रजामात्रोर्विशेषाभावात्। अतश्चतेतवपाल्यः
पालयितुमुचितः चपुनःपौरजानपदाःजनाःकृपणाःदीनाःअतःपाल्याइतिलिंगवचनव्यत्या
सेनयोज्यं॥ तदुभयं। चापत्रापरूपं॥ तद्दिस्यप्रयांसरघुनंदनइत्यर्थः। पुत्रभांडपुत्रपात्रंपुत्रर
स्थानापन्नमितियावत्। स्याड्डमस्थाभरणेमत्रेमूलवणिक्धनेइत्यमरः। भूयिष्ठाः बहुतराः द्वि
जाः बालाः वृद्धाः विकलाः स्त्रैणा निस्त्रीसमूहाश्वयस्मिन्सत्तथा॥ शष्पाणि। बालतृणानि। नि
कृतिंडकान्पुरीषपिंडान्आम्रपरिमाणान्। पताकासौभाग्यं॥ पताकावैजयंत्यांचसौभा
न्यंकेध्वजेपिचेतिविश्वलोचनः॥ वीरघोषणा। वीरडिंडीरवः। ३ क्ष्वेडापुष्टंतुघोषणेस्यमरः
धिग्जाल्मान्॥ जाल्मोसमीक्ष्यकारीस्यादित्यमरः। शूरस्यआधा शूरस्यकरा एषधराकोश्वः ४

आत्ममात्रान्

तु·टी
॥१५॥

हिंतानां मृगाणां मध्ये चरतु गच्छतु भक्षयतु इति वा ।। गौकर्णेषु षतेण तूर्यरो हिंता श्वमरो मृगा इत्युः ।। इत्युनारटी
कायां चतुर्थांकः ।। उद्धतेन रथोद्धतेन प्रचलितः कोविदारकेतुर्युगपत्त्रसंबधी ध्वजो यस्य। प्रथने युद्धे
भयमिति। अयं पुरोवर्ती एककः एकाकी ।। एकाकी त्वेक एककश्चेत्यु॰ बालकः बले ः सैन्यैः आवृतः आच्छादि
तः सर्वतो व्याप्त इति यावत्। कीदृशैर्बलैः ।। समररेणो सांग्रामिकधूलिमध्ये भूरीणि स्फुरंति दीप्य
मानानि कराला सुकरक दली षुहस्त रूपवृक्षद्विशेषेषु ।। कंदलीतु मृगवृक्षविशेषयोरिति विश्वः ।। क
लितानि धृतानि मूरस्त्रजालानि आयुधसमूहा येस्तानि तैः ।। जटितानीति पाठे स एवार्थः पुनः ।। कीद
शैः ।। क्वणंत्यः शब्दायमानाः कनककिंकिण्यः सुवर्णक्षुद्रघंटिकास्ताभिः क्षणक्षणायिताः स्यंद
नारथा येस्तानि तैः ।। क्षणक्षणेति शब्दानुकारः ।। पुनः कीदृशैः ।। अमंदोऽन्यूनोऽतिशायितः मदो
येषां तानि अत एव दुर्दिनानीव मेघच्छन्नाहानीव द्विरदडामराणि गजसमूहा येषु तानि तैः ।। द्वि
रदवारिदैरिति पाठे अमंदमदाः दुर्दिनानीवे द्विरदा वारिदा इव येषु तानि तैः ।। द्विरदवारिदैरित्य
त्रोपमैव। वारिदेषु मदासंभवात्। तपतः संजाततप्तैः कालस्यांतकस्य करालं वक्त्रं मुखं तस्य वि
घसे भोजन शेषे ग्रासैः व्याकीर्यमाणा इव ।। भयमिति। अयं समंतादुत्सर्पन् प्रसरमाणः ब

ला

लस्यसैन्यस्ययातुमुलहेलारणसंकुलक्रीडा। तुमुलेरणसंकुलेइत्य॰ हेलालीलेत्यमीहावाइत्य॰ तत्संबधीयः
कलकलः कोलाहलः मेममकेलाघातेनक्षुभितोयोवडवावक्त्रहुतभुक्वडवानलः सइवयः प्रचंडक्रोधाग्नि
र्घोनिचयः समूहस्तस्यकवलस्तंग्रासस्तंप्रजतु। मलयपवनास्फालितःपयोराशेः समुद्रस्यप्रवाहइव
माघवतचापधरस्य। मघोनः इंद्रस्यायंमाघवतः चापोधनुस्तद्धारयतितिस्य। व्यतिकरइति। तामम
सःतमः संबधीवैद्युतः विद्युत्संबधीभीमः व्यतिकरः संबधः। व्यतिकरःसमाख्यातोव्यसनव्यति
षंगयोरितिविश्वः। ग्रस्तंसत्तमुक्तं। तमःसंबंधेनग्रस्तं विद्युत्संबंधेनमुक्तंइत्यर्थः। प्रणिहितमपि
चक्षुर्हिनस्तीव। विषयग्रहणासमर्थंकरोतीव। पाताल इति। जृंभकेः नभआकाशं अवाकीर्यते। व्या
संक्रियते। कीदृशैः। पातालोदरकुंजेपुंजितयत्तमः तद्वत्श्यामैः। पुनः की॰ उत्तंसस्फुरत्सदारकूटपि
त्तलेः। रीतिः स्त्रियामारकूटइत्य॰ तस्ययानिकपिलानिज्योतींषितद्वज्ज्वलंसोदीप्सयोयेषांताः
नितैः केरिवा विंध्याद्रेः कूटैः शिखरैरिव। कूटोस्त्रीशिखरंशृंगमित्य॰ कल्पाक्षेपेकल्पांतेक
ठोरः भैरवश्चयोमरुत्तेनव्यस्तैः। पुनःकीदृ॰ मीलंतोमेघातडिनश्चताभिःकडाराणिपिंगला
नि। कडारः पिंगलेदासइतिविश्वः। कुहराणिविवराणियेषांतानितैः ५ कुहरकोटरेच्छिद्रेनग

मेः

रोगविशेषयोरिति विश्वः। भूयसा बाहुल्येन। उपचारः परस्परसंवादः। तारामैत्रकं। ग्रहमैत्र्यादि ज्योतिः
शास्त्रप्रसिद्धं। चक्षूराग इति। अत्र तिसंख्येयं प्रतिसंख्यातुमशक्यं। उन्मीलंति प्रकटीभवंति पुलका
नां रोमांचानां कदंबानि समूहा यस्मिंस्तत्तथा। अन्यथा अयं रामभद्रस्तनय इति। बीजं सीता रू° पं ५
शौर्यस्त्राण्येव देवता येषां ते तथा शस्त्राजीवाः सत्क्षत्रिया इति यावत्। झणत्कारेण क्रूरं क्वणितं यस्य
सत्तथा तादृशो गुणो यस्य तादृशं गुंजत् शब्दायमानं गुरु श्रेष्ठं यद्धनुः तत्र धृतं प्रेम येन सत्तथा। आ
र्येति सुमंत्रं प्रति संबुद्धिः। धिनोतु प्रीणयतु। मैत्रावरुणिर्वसिष्ठः। मत्सरा मात्सर्ययुक्ताः॥ मत्स
रोन्यशुभद्वेषे मात्सर्ये कृपि मत्सर इति विश्वः। सव्याहारः योयमश्व इत्यादिः पूर्वमुक्तः। निर्ऋतिः
अलक्ष्मीः। स्यादलक्ष्मीस्तु निर्ऋतिरित्यम॰ खरा योधने। खरं सुद्धे अकुतोभयानि न विद्यते कुतः
कस्मादपि भयं येषु तानि तथा यानि त्रीणि पदानि आसन्। न हि परायित्तस्य कुतश्चिद्भयमस्ती
ति अकुतोभयानि पश्चात्सरावृत्तानि पदान्युच्यंते। तत्रापि जनः अभिज्ञः। खरेण सह युद्धे रामभद्रः
परत्रयपरावृत्त इति प्रसिद्धिः। कुतोमुखान्यपीति पाठः क्वचित्। अकांडतांडवित्तयो भुवो भंगे
नवकं उत्कट लोष्ठनस्य चंद्रस्य ठक्कार भगस्य कमरुस्य चकार तिं धत्ते। इति उत्तररामचरित्रटीकायां पंच

युद्धसुरतादेरभिनेयत्वेन दृश्यत्वासंभवात्सूच्यत्वमभिप्रेत्य कुमारयोर्युद्धं विष्कंभकेनाह। ततः प्रविशतीति
विकर्तनः सूर्यः। स्रणत्स्रणितीति। अनयोरिदमायोधनं युद्धं अभिवर्द्धते। कीदृशयोः। धनुः चापं वि
तत्स शरान् किरतोर्वर्षतोः। कीदृशं धनुः। स्रणत्स्रणितिति तत्र कंकणस्य करभूषणस्य क्वणितं शब्दितं तत्र
क्वणितं यासां ताः। मध्यमपदलोपी समासः। एतादृश्यः किंकिण्यः क्षुद्रघंटिकाः यस्मिन् तत्तथा।
पुनः कीदृशं। गुणश्चाटन्यो वगुणाटन्यः ध्वनंत्यः गुर्व्यश्च ताः गुणाटन्यश्च ताभिः वृत्तः कोलैः कोला
हलो येन यस्मिन्वा तत्तथा। ध्वनदिति पृथक्त्वा धनुर्विशेषणे। गुरुगुणाटनीसादीनि धनुर्वितस्ये
त्तिक्रियाविशेषणानीति केचित्। मौर्वी ज्या सिंजिनी गुण इत्य। कोटिरस्याटनी गोधेत्यमरः।
विजृम्भितमिति। द्वयोरपि मंगलाय दिव्यस्य दुंदुभेः पटहस्य आमंद्रं आमंदं दुमदुमायितं दुमदुमेत्या
कारशब्दितं। विजृम्भितं। कस्येव। स्तनयित्नोः खमेघस्येव। अचिरलेलादिपुष्पनिपातविशेषण।
लाटे इति। ननु किं नु खलु ललाटस्थनयनं नीललोहितस्य महादेवस्य चक्षुः तृतीयेन नयनं तस्य पुट
योः पक्ष्मणोः भेदः विघटनं किं महादेवतृतीयेन नयनोद्घाटनमिव सुलेखा। कीदृशः पुटभेदः।

१.५.८१.
॥१९६॥

वहुरिदं त्वाष्ट्रं यदंत्रं तत्र भ्रम्यां भ्रांतः संजातभ्रमणो यो मार्तंडः सूर्यः तस्य ज्योतिरिव तेजः इव। उत्कर्षे
ण ज्वलति दीप्यते स तथा। अवदग्धेति। संप्रति अवदग्धानि अत एव कर्बुरितानि चित्राणि। चित्रं
किर्मीरकल्माषशबलैताश्च कर्बुरे इत्यमरः। केतुचामराणि येषां तैः विमानमंडलैः देवयानसमूहैः
अपयातमेव अपसृतमेव। इमाः शिखाः वह्नेरर्चिषः। वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा
स्त्रियामित्यमरः। ध्वजाश्चांकुशाश्च पद्मं च ताश्च तेषु लक्षणं यत् कुंकुमस्य केसरस्य स्फुरणं मिश्रीभावः
तस्य विभ्रमं भ्रांतिं दधति। उषर्बुधः अग्निः। विष्कंभकः तल्लक्षणं तु प्राक्। चिंताग्रहः सी
ता वियोगजन्यः संतापः। वीरप्रकांड वीरेषु प्रकांड प्रशस्तवीर इत्यर्थः। मतल्लिका मचर्चिका
प्रकांडमुद्धतल्लजौ प्रशस्तवाचकान्यमूनीत्यमरः। ब्रह्मकोशस्य ब्रह्मणः कोश इव धनमिव संरक्ष
णीयत्वेन। ब्रह्मांडांतर्वर्ति सकलभूतजातमित्यर्थः। समुदयः समुदायः। महार्घः महानव
हुतरः अर्घो मूल्यं यस्य स तथा। दुर्लभ इति यावत्। तीर्थानां पुण्यक्षेत्राणां। तीर्थं शास्त्रावता
रयोः पुण्यक्षेत्रे महापात्रे इति विश्वलोचनः। एकपदे वा युगपद् वा विप्रतिषिद्धं तुल्यबलविरो
धः। स्नेहस्य निमित्तसव्यपेक्षित्वनियमेन निमित्ताभावेपि स्नेहासत्तिरिति तुल्यबलविरोधः

मास्था। ब्रवीषि। परिणतेति। परिणतमत एव कठोरं यत्पुष्करं कमलं तस्य गर्भस्थदलवत् अतिमध्यवर्ति
पर्णवत्पीनमसृणः अतिशयितचिक्कणः सुकुमारश्च। अभिद्रुग्धां द्रोहमाचरितः। आग्नेयो
ग्रावा। सूर्यकान्तोपलः। निकृतः पराभूतः। अमर्षः परोत्कर्षासहिष्णुता। शस्त्रशिखिनः। शा
स्त्राग्नयः। इन्द्रमणेर्नीलमणेः छविरिव मेचका नीला छविर्यस्य स तथा। कृष्णे नीलासितश्या
मकालश्यामलमेचकाः इत्यमरः। डम्बरं आटोपः अनुभूतिर्वीतघस्यास्ति स तथा। दन्तपुलकमिति
दानक्रियाविशेषणं वा नवनीलेत्यादि। संहननं शरीरं। शालानां वृक्षाणां छाया शालच्छा
यं छाया बाहुल्ये इति नपुंसकवद्भावः। प्रश्रययोगे पि। विनययोगे पि। वपुरिति। कुशस्य चल
वस्य चेति पूर्वश्लोकोक्तं इहाप्यनुषज्यते। अविहिता अकृत्रिमाश्च ते सिद्धाश्चेति तथा तादृशा
एव लक्ष्मीविलासा लक्ष्मीः शोभा विलासाश्च लक्ष्म्या वा विलासाः वपुः शरीरके तन्वति। प्र
कटयति। कीदृशं वपुः जनं प्रति इति प्रतिजनं कमनीयं प्रतिजनानां शत्रूणामपि कमनी
यमिति वा। पुनः कीदृशं कान्तिमत्। प्रशस्तकान्तियुक्तं। केकमि। वयन्तं प्रसिद्धाः अनिर्वा

ध्यलेनातिशङ्किता वामनोत्ताः सुंदराररस्य: किरणा अमलिनं रत्नमिवापुनः केकीदृशमिव । मकरं
र:पुष्परस: तत्संबधिनो माकरंदा बिंदवः विप्रुषः विकसितमरविंदमिव । अरविंदं सितांभोजमि
त्य० अबंधुरावनीचोऽन्नताविति यावत् । अंसौ स्कंधौ । स्कंधौ भुजशिरोंऽसो स्त्री त्य० ययोस्तौ
तथा तयोः कुशलवयोः वपुः शरीरं । कठोरेति तरुणः जरठोवायः पारावतः कलरवः तस्य यः
कंठः तद्वन्मेचकं श्यामं । वृषस्कंधं चावीक्षितमवलोकनं च प्रसन्नं स्मितं हसितं मितं प्रसन्नः अत्र
स्तः अक्षोभो वा यः सिंहः तद्वलोकनमिव स्मितमितं निश्चलं अत्र स्तम कं रवेस्थः । प्रसन्न
स्तत्र मृगनयने स्तत्रैव लघु सोपमानपदत्वान्मध्यमपदलोपी समासः । एवमन्यत्रापि एवं जाती
य वेद्रष्टव्यं । ध्वनिः शब्दश्च मंगल्यमृदंगशब्दवन्मांसलः अतिपुष्टो गंभीर इति यावत् । अपी
ति । जनकसुतायाजानक्या अपितच्युतद्धस्तपादादिकं चिबुकनासिकादिकं च दृष्ट्वा शिशुयु
ग्मे लव कुशरूपे बालकयुगे अनुरूपं तुल्यमस्ति परं तु नैपुण्यन कुशलतया च प्रणिधान वि
शेषेणेति यावत् । पुनेयुग्मे तु निश्चेतुं शक्यं । ननु इति वितर्के । अभिनवं यत् शतपत्रं कमलं
तस्य श्रीरिव श्रीर्यस्य तत्तथा । एतादृशं तत् पूर्वानुभूतं मिया या आस्यमुखं पुनरिदानीम

पिमे मम अक्ष्णोर्नेत्रयोर्गोचरीभूतमिव। मुक्तेति। मुक्ताः मुक्ताफलानीव अच्छाये दंतास्तेषां याच्छ
विः कांतिः तया दंतुरा नतोन्नता। रक्तनीलेति। पुरुषनेत्रयोरतिरक्तत्वस्य सामुद्रिके प्रशस्त
त्वेनाभिधानादुक्तं। त्वदर्थमिति। अयं शिलापट्टः त्वदर्थमिव अग्रतो विन्यस्तः अयं कः। अयं के
सरः नागकेसरवृक्षः। चांपेयः केसरो नागकेसरः इत्य॰ यस्याभितः पुष्पैः प्रवृष्ट इव। मंदा
किनी चित्रकूटप्रदेशस्था काचनत्तन्नामक नदी। अनेन श्रमे स्यादिना सुरतांतवर्णनं। अयमेव
चतत्समयविश्रंभात्तिप्रसंगस्य स्मरसीत्यादिना पूर्वमुक्तः। कुकूलानां करीषाग्नीनां। कुकूल
स्तु करीषाग्निरित्य॰ संबंधेया स्पृहणीयता औचित्यं तया प्रमुदितैः हर्षयुक्तैः। गोत्रमंगलेष
गोत्रस्य वंशस्य मंगले। सीताप्राप्तिरूपमित्यर्थः। इत्युत्तररामचरितटीकायां षष्ठोंकः ॥६॥ अ
श्लिष्टां गिरं सो। सश्लिष्ट शतानंदो। शालीनता शीलतां। अधार्ष्ट्यशीलतां। शालीनकौपीने अ
धृष्टाकार्ययोरिति निपातः। स्याद्धृष्टे तु शालीन इत्य॰ वत्साविति द्वितीया द्विवचनांतं कर्म।
वयं वत्सौ पुण्यैः प्राप्तास्म इत्यर्थः। सानुषंगाणि। अनुषंगेण उत्तरोत्तरकल्याणसंबंधेन स
हवर्तमानानि। भरतवाक्यं। पाप्मभ्य इति। अभिनयैः संगीतशास्त्रोक्तैः हस्तकादिविशेषैः

विन्यस्तानि अभिनीतानि रूपाणि नाटकादीनि दशरूपाणि येस्ते तादृशा बुधा बोद्धारः अधीतस
कलविद्याः पंडिता इति यावत्। शब्दब्रह्मविदः कवेः पंडितस्य लोकोत्तरवर्णनानिपुणस्य वा। एतां तां
आसमुद्रांकितभूमंडलमभिव्याप्य प्रचरद्रूपस्थां इमां वाणीं परिभावयंतु सूक्ष्मासूक्ष्मविवेकेन प
रिशीलयंतु। तां कां। ये यं पापेभ्यः पुनाति श्रेयांसि वर्द्धयति। कथया श्रीरामकथया मंगल्यां मं
ग [illegible] लरूपां। जगतो विश्वस्य मनोहरां। सर्वत्र पापपवित्रीकरणादावपि कथा मंगल्यत्व
मेव हेतुर्व्याख्येयः। गंगेव मातेव च। सर्वेपि चकाराः परस्परसमुच्चयार्थाः। यद्वा येयं राम
कथा एतादृशगुणविशिष्टा तां एतां परिभावयंतु। कवेरिमां वाणीं च परिभावयंतु इति क्रि
यानुषंगेण व्याख्येयं। शेषं तथैव। विन्यस्तरूपामिति पाठे वाणीविशेषणं॥ मुखं प्रतिमुखं
संधिः सावमर्शोपसंहृतिरिति पंच संधयः तेषां प्रत्येकमंगानि लक्षणानि दशरूपकादौ
विस्तरतरउक्तानि तेषां लक्ष्ये लक्षणयोजनं अधीतनाट्यालंकारैः सुधीभिरनुसंधेयं विस्त
रभयादनतिप्रयोजनत्वाच्च नोपवर्णितमित्युपरम्यत इति दिक्॥ इति श्रीमोनिवंशोत्सन्नर
गनाथदीक्षितसूनोर्भट्टनारायणस्य कृतावुत्तररामचरितोपक्षिप्तव्याख्याने सप्तमोंकः॥

वाराणसीनियतवासपवित्रकीर्तेः श्रीरंगनाथविदुषो विहिताध्वरस्य ॥ श्रीबालकृष्ण इति यः
प्रथितस्तनूजः तस्याग्रजेन रुचिरा विवृतिर्व्यधायि ॥ १५ यो मौनभट्टबुधबंधुरधीतविद्यः श्री
तातभट्टसुकृती कृतिकृष्णसूनुः ॥ श्रीरंगनाथतनयेन तदीयपौत्रनारायणेन सुधिया र
चितेति टीका ॥ १६ ॥ ऋतुगजरसचंद्रे १६८६ विक्रमार्कस्य शाके गतवति शुभमासे कार्ति
के कृष्णपक्षे प्रतिपदि परिपूर्णा कारि जिज्ञासुतुष्ट्यै विवृतिरियममुष्मे कृष्णाधिष्ठिता यान
गर्यो ॥ १७ ॥ शाके १७८६ आश्विनमासे कृष्णपक्षे द्वितीयायां घाटोपनाम्ना श्रीकृष्णसुते
न जयकृष्णेन सुधिया उत्तररामचरितनाटकं सटीकं स्वार्थं लिखितं शोधितं च ॥

॥ अथ श्री उत्तररामचरित्र ॥

(टीका)

38

नमो नम एतेभ्यः॥१९

श्री॥ उत्तररामचरितप्राकृतच्छायेयं॥ १॥ सी॰ जानाम्यार्यपुत्र जानामि किंतु संतापकारिणो बंधुजनविप्रयोगा भवं
ति॥ २॥ आर्य ततः किं विलंब्यते॥ ३॥ नमो नमस्ते। अपि कुशलं समग्रस्य मम गुरुजनस्य आर्यायाः
शांतायाः॥ ४॥ अस्मान्वा स्मरति॥ ५॥ अत एव राघवकुलधुरंधर आर्यपुत्रः॥ ६॥ भवतु आर्यपुत्र भवतु एहि प्रेक्षा
महे तावत्ते चरित्रं॥ ७॥ क इदानीमेते उपरि निरंतरस्थिता उपस्तुवंतीवार्यपुत्रं॥ ८॥ अनुगृहीतास्मि॥ ९॥ एष नवनीलो
त्पलश्यामलस्निग्धमसृणशोभमानमांसलेन देहसौभाग्येन विस्मयस्तिमिततातदृश्यमानसुंदरश्रीरनादरखंडितशं
काकपक्षः स्तुदर करशरासनः शिखंडमुग्धमुखमंडल आर्यपुत्र आलिखितः॥ १०॥ एते खलु तत्कालकृतगोदानमंगलाश्चत्वारो भ्रातरो विवाह
दीक्षिता यूयं जानामि तस्मिन्नेव प्रदेशे तस्मिन्नेव काले वर्ते॥ ११॥ वत्सरयमपि अपराद्धः॥ १२॥ भीतास्मि॥ १३॥ शोभसे आर्यपुत्र
एतेन विनयमाहात्म्येन॥ १४॥ एष जटासंयमनदृढ तातः॥ १५॥ एषा प्रसन्नपुण्यसलिला भगवती भागीरथी॥ १६॥ स्मर
स्येन प्रदेशं आर्यपुत्रः॥ १७॥ अलं तावदेतेन प्रेक्ष्ये तावदार्यपुत्र हस्तधृततमालवृंतातपत्रमात्मनो दक्षिणारण्यप्रवेशा
रंभं॥ १८॥ हा आर्यपुत्र एतावद्दुर्वद्दर्शनेन॥ १९॥ यथा तथा भवतु दुर्जनो असुखमुत्पादयति॥ २०॥ अयि देव रघुकुलानंद एवं
मम कारणात्क्लिष्टोसि॥ हाधिक् हाधिक् अहमप्यतिभूमिं गतेन रणरणकेण आर्यपुत्रशून्यमिवात्मानं प्रेक्ष्ये ५

५०८१०

२२॥ हा तात निर्व्यूढस्ते अपत्यस्नेहः। २३ अत्र किलार्यपुत्रेण विघ्नं दित्तामर्षधीरस्तु प्रयुक्तः कंठं रुदितमासीत्॥ २४
एष स चिरनिर्विण्णजीवं प्रसुद्धरण गुरुकोपकारी महाभागो मारुतिः॥ २५। वत्सैष कुसुमिततरुतांडवितब
र्हिणः किंनामधेयो गिरिः। यत्रानुभाववसौ भाग्यमात्रपरिक्लेषधूसरश्रीर्मूर्च्छन्ती मूर्च्छेनूत्वया प्ररुदितेनाव लंबि
तस्तरुतले आर्यपुत्र आलिखितः॥ २६ आर्यपुत्र एतेन चित्रदर्शनेन प्रत्युत्पन्नदोहदाया अस्ति मे विज्ञाप्यं॥
२७। जानामि पुनरपि प्रसन्नगंभीरासु वनराजिषु विहरिष्यामि। पवित्रसौम्यशिशिरावगाहां च भगवतीं भागीरथीं अ
वगाहिष्ये॥ आर्यपुत्र सुषाभिरपि तत्र गंतव्यं॥ २९। तेन प्रियं मे। ३० एवं भवतु अपरिखिये खलु परिश्रमजनितया नि
द्रया॥ ३१ स्थिरप्रसादा यूयं इतः इदानीं किमपरं। ३२ प्रियंवद एहि सविश्रामः। ३३ अस्ति तदार्यपुत्रास्ते ततः॥
३४ प्रतीः देव उपस्थितः। ३५। आसन्नपरिचारकोदुर्मुखो देवस्य ३६। हा कथं सीतादेव्याई दृशम चिंतनीयं जना
पवादं देवस्य कथयिष्यामि॥ अथवा नियोगः खलु ईदृशो मंदभाग्यस्य। सी० हा आर्यपुत्र सौम्यं कुत्रासि
३८ दुर्मु० उपस्तुवंति देवं पौरजानपदा विस्मारिता वयं महाराजदशरथस्य रामभद्रेण॥ ३९। श्रुणोतु देवः। ४० आ
श्वासतु देवः। ४१। कथमिदानीं गर्भपरिशुद्धाया गर्भपरिस्फुरितपवित्ररघुकुलसंतानाया देव्या दुर्जनवचनादा
र्येणानार्यव्यवसितं देवस्य। सी०। हा सौम्य आर्यपुत्र कुत्रासि हा धिक् दुःस्वप्नेन विप्रलब्धा अहं मानंदामि।

द्वितीयार्थपष्टौ। मध्यते लिंगवचनेमतंत्रेव

हाधिकूहाधिकूकथमेकाकिनींमांउज्झित्वाआर्यपुत्रोगतः तत्किमिदानीमेतत् ।भवतुस्वकुपिष्येयदितंप्रेक्ष
माणाआत्मनःप्रभविष्यामि।कोत्रपरिजनः।२ दुंदेविकुमारलक्ष्मणोविज्ञापयतिसज्जोरथो।आसेहहुदेवी
~~सी।३ इयमास्हामिपरिस्फुरन्तीवमेगर्भभारस्ततःशनैर्गच्छामः।४५।।नमोनमस्तपोधनेभ्योनमोनमोर
घुकुलदेवताभ्यः नमोनमआर्यपुत्रचरणकमलाभ्यांनमोनमःसकलगुरुजनेभ्यः।।३ इतिछायायांप्रथमो
कः।।१ आश्चर्यंनामामिमेप्रियसखीमेवासंतीव्याहरति।आर्यपुत्रपरित्रायस्वपरित्रायस्वममतंपुत्रकंविचिंस्य
हाधिकूतान्येवचिरपरिचितान्यक्षराणिपंचवटीदर्शनेनमांमंदभागिनींअनुबध्नंति हाआर्यपुत्र।२ उज्जलभंतमे
घस्तनितगंभीरमांसलः कुतोनुएषभारतीनिर्घोषभ्रियमाणकर्णविवरांमामपिमंदभाग्यांझटितिसुच्छ्रास
यति।४ भवतिकिंभणसिअपरिस्फुटमितिमयापुनःस्वरसंयोगेनआर्यपुत्रएवव्याहरति।५ दिस्साअपरि
हीनसजधर्मःखलु सराजा।६।हाकथंप्रभातचंद्रमंडलापांडुरपरिक्षामदुर्बलेनायंसौम्यगंभीरानुभावमा
त्रप्रभिज्ञातआर्यपुत्रएवतस्मान्मांधारय।७ हाधिकूहाधिकूमांमंदभागिनीमुद्दिश्यआमीलन्नेत्रनीलोस
लोमूर्छितएव हाहाकथंधरणीपृष्ठेनिरुच्छ्वासनिस्संहविपर्यस्तः।भगवतितमसेपरित्रायस्वपरित्रायस्व
जीवयजीवयार्यपुत्रं।८ यद्भवतुतद्भवतुयथाभगवतीभणति।९ जानेपुनरपिप्रत्यागतमिवजीवितंत्रैलो
क्यनाथस्य।१० एतावदेवमेइदानींमेबहुतरं।११ किमितिमामार्यपुत्रोमागमिष्यति।१२ भगवतितमसेअपस

ग

स्य

प्रसा

११३-८२१।
११२५

रवः। यदि तावन्मां प्रेक्षिष्यते ततो नाभ्यनुज्ञातसंनिधानेनाधिकमपि मम राजा कुपिष्यति॥१३॥ अयि अस्य तात
१४ आर्यपुत्र असदृशं खल्वेतत्तस्य वृत्तांतस्य अथवा किमिति वज्रमयी जन्मांतरेष्वपि असंभावितदुर्दर्शनां दुर्लभ
मामेवमंदभागिनीमुद्दिश्य वत्सलस्यैवंवादिन आर्यपुत्रस्योपरि कथं निरनुक्रोशा भविष्यामि। अहमेतस्य हृदयं
जानामि ममाप्येष इति॥१५ भगवति तमसे तदा निष्कारणपरित्यागिनोप्येतस्यैवंविधेन दर्शनेन कीदृश इव हृद
यातुबंध इति न जानामि॥१६॥ एते खलु ते अगाधदर्शितस्नेहसंभाराः आनंदनिष्यंदिनः श्रुता मया आर्यपुत्र
स्योल्लापा येषां प्रत्ययेन निष्कारणपरित्यागशल्पितोपि बहुमतो मे जन्मलाभः॥१७ क इदानीमभिमोक्ष्यते
१८ कथं प्रियसखी मे वासंती॥१९ हा तात जटायो शून्यं त्वया विना जनस्थानं॥२० सा संवनदेवतापि मां न प्रेक्षते ५
२१ तत्तानुसरावः॥२२ आश्चर्यं दिष्ट्या एष संवृत्तः॥२३ अविमुक्त [illegible]मिदानी मयं दीर्घायुस्तया सौम्यदर्शनया समं
भवतु॥२४ भगवति तमसे अयं तावदीदृशः स्तो पुनर्न जानामि कुशलवावेतावता कालेन कीदृशौ विभवतः। ५
२५ इदृशी अहं मंदभागिनी यस्या न केवलं निरंतरमार्यपुत्रविरहः पुत्रविरहोपि॥२६ किं वा मया प्रसूतया येन ता
दृशमपि मम पुत्रयोरीषद्विरलकोमलधवलदशनोज्ज्वलकपोलमनुबद्धमुग्धकाकलीविहसितं निबद्धका
कशिखंडकममलमुखपुंडरीकयुगलं न परिचुंबितमार्यपुत्रेण॥२७ भगवति तमसे एतेनापत्यसंस्मरणेन उ
च्छ्वसितप्रस्नुतस्तनी तयोश्च पितुः संनिधानेन क्षणमात्रे संसारिण्यस्मि संवृत्ता॥२८ तं षस एष सः ५

एवं भवतु ।२८ ।   पंचवटी सैव

२९ सुष्ठु प्रत्यभिज्ञातमार्यपुत्रेण ।३० सखि वासन्ति किं त्वया कृतं आर्यपुत्रस्य मम चैतद्दर्शयन्त्या हा धिक् हा धि-
क् स एवार्यपुत्रः तदेव पंचवटीवनं सैव देवी वासन्ती त एव विविधविस्रम्भसाक्षिणो गोदावरीकाननोद्देशास्त ए-
व जातनिर्विशेषा मृगपक्षिपादपाः सा चैवाहं मम पुनर्मन्दभाग्याया दृश्यमानमपि सर्वमेवैतन्नास्तीति ई-
दृशो जीवलोकस्य परिवर्तः ।३१ प्रेक्षे सखि प्रेक्षे ।३२ हा देव एष मया विना अहमप्येतेन विनेति स्वप्नेऽपि
केन संभावितमासीत् तन्मुहूर्तकमपि जन्मान्तरादिव अनुलब्धदर्शनाबाष्पसलिलान्तरेषु प्रेक्षे तावद्वत्सल-
मार्यपुत्रं ।३३ सखि वासन्ति किं त्वमप्येवंवादिनी प्रियार्हः खलु सर्वस्यार्यपुत्रो विशेषतो मम प्रियसख्याः ।३४
सखि वासन्ति विरम ।३५ त्वमेव सखि दारुणा कठोरा च या एवं प्रदीपयसि ।३६ आर्यपुत्र [illegible] धरामि एषा धरा-
मि ।३७ हा धिक् हा धिक् आर्यपुत्रोऽपि प्रमुक्तकण्ठं रुदितः ।३८ क्षोभितास्मि आर्यपुत्रस्यैतैर्वचनैः ।३९ एवमस्मि
मन्दभाग्या पुनः पुनरायासकारिणी आर्यपुत्रस्य ।४० एतेनार्यपुत्रस्य दुर्वारदारुणारम्भेण दुःखसंक्षोभे-
ण प्रस्फुरित निजदुःखमिवाकंपितं मे हृदयं ।४१ संदीपनान्येव दुःखस्य सखीविनोदनोपाया इति मन्यते ४-
२ दारुणासि वासन्ति दारुणासि या एतैर्हृदयमर्मगूढशल्यसंघट्टैः पुनः पुनर्मां मन्दभाग्यामार्यपुत्रम-
पि दुनोषि ।४३ हा धिक् हा धिक् पुनरपि प्रमूढ आर्यपुत्रः ।४४ हा आर्यपुत्र मां मन्दभाग्यां उद्दिश्य सकल-

एवमेतत्   जीवामि ।।

बालकृ
दि
दीसं

व

43

॥उ.च.॥

॥२॥

जीवलोकमंगलाधारस्यते जन्मलाभस्यवारंवारं संभूषितजीवितदारुणो दशापरिणाम इतिहा हतास्मि
४५ अथ सत्तु मिथ्या मि एषपुनश्चिरसद्भावसौम्यशीतलेनार्यपुत्रस्पर्शेन दीर्घदारुणमिव संतापं कुर्वता व
ज्रलेपोपनिबद्ध इवसज्यमाननिःसहविपर्यस्तवेपनशीलोऽवशाद्रवमेहस्तः ।४६ आर्यपुत्र सएव इदानी
मस्मित्वा ।४७ अधिक् हा धिक् आर्यपुत्रस्य शीमोहिता याः प्रमादः खलुसंवृत्तः ।४८ हा धिग्वृ हा धिक् अ
नवस्थितस्तिमित मूढपूर्णमाननयनो नपर्यवस्थापयति आत्मानं ।४९ विस्मये अवशोनैतेनास्म नाले
ज्जापितास्मि भगवत्याः तमसा किमिति किलेषामंस्यते एषपरित्याग एषोभिषंग इति ।५० सत्यमक
रुणास्मि या एवंविधं त्वां प्रेक्षमाणा धराम्येवजीवं ।५१ आर्यपुत्र विपरीतमिव ।५२ मयेवदारुणया वि
प्रलब्ध आर्यपुत्रः ।५३ आर्यपुत्र तातो व्यापाद्यते अहं चापद्धिये परित्राय स्वपरित्रायस्व ।५४ अहो उन्म
तास्मि संवृत्ता ।५५ निरवधिरिति हा हतास्मि मंदभागिनी ।५६ बहुमानयितास्मि तं पूर्वविरहं ।५७ भ
गवतितमसे गच्छतोत्येवार्यपुत्रः ।५८ भगवति प्रसीद क्षणमात्रमपि दुर्लभं जनं प्रेक्षे ।५९ आर्यपुत्र इदा
नीमसि त्वं उत्खातमिदानीं परित्याग [illegible] लज्जाशल्यमार्यपुत्रेण ।६० धन्या सा या आर्यपुत्रेण ब
हमन्यते या आर्यपुत्रं विनोदयति आशानिबंधनं जाता जीवलोकस्य ।६१ परिहसितास्मि भगव
त्यौ तमसया ।६२ प्रतिकूलेदानीमेवासंती संवृत्ता ।६३ एवं कुर्वः ।६४ नमो नमोऽकृतपुण्यजनादर्शनीय

आर्यपुत्रक

१ आगतमयानध्यायकारणं सविशेषभूतमद्यजीर्णकूर्चानां ।२ भो भांडायन किंनामधेय एष महतः स्थविर
र्थस्य धुरंधर अथातिथिरागतः ।३ हुं वसिष्ठः ।४ मया पुनर्ज्ञातं याघ्रो वा वृको वा एष इति ।५ तेन परापतितेन व
सा वराकिका वत्सतरी भक्षितेति ।६ भो निगृहीतोसि ।७ येनागतेषु वसिष्ठमिश्रेषु वत्सतरी विशसिता अद्ये
वागतस्य राजर्षेर्जनकस्य भगवता वाल्मीकिना पिदधिमधुभिरेव निर्वर्तितो मधुपर्को वत्सतरी पुनर्विसर्जि
ता ।८ ततः किमित्यागतः ।९ अप्यद्य संबंधिनीभिः समं संवृत्तमस्य दर्शनं न वेति ।१० यथा एते सर्वे स्थविराः प
रमिलितास्तथा आवामपि बटुभिः समं अनध्यायमहोत्सवं खेलंतो संभावयावः ।११ कौश० ।ईदृशो
काले मिथिलाधिपं दृष्ट्वा इति समम् एव सर्वाणि दुःखानि समुद्भवंति नराणां मित उद्वर्तमानमूलबंधनं
हृदयमवस्थापयितुं ।१२ कथं वत्सायाश्चावस्था एवं गते तस्य राजर्षेर्मुखं द्रष्टुं याम ।।१३ एष स महाराजस्य ह
दयानंदो वत्साः पिता राजर्षिः हा धिक् हा धिक् संभाविता स्मि अनुष्ठितमहोत्सवे दिवसे हा देव सर्वमपि
तन्नास्ति ।१४ अम्मा उन्मीलति वेदना ।१५ हे वत्से जानकि कुत्रासि स्मरामि ते विवाहलक्ष्मीपरिग्रहेक
मंगलं प्रस्फुरदनुबद्धहसितमुग्धमुखपुंडरीकं आस्फुरत्कौमुदीचंद्रचंद्रिकासुंदरे रंगे केरलासय

।।३.घ१.
।।४।।

जोतपुनरप्युद्योतयोः संगं सर्वथा महाराजो भणति एषा रघुकुलमहत्तराणां वधूरस्माकं ।उ जनकसंबधे
न दुहितेव।१६।। जाते जोना मिथिलकरो मिद्द वज्रलेपघट्टितबंधनिश्चलेमे बहत जीवितं तथा अत्र मां मंदभा
गिनीं न परित्यजति।१७ भगवति अतिक्रांतो मनोरथः।१८ सुलभसौख्य इदानीं बालत्वं भवति।१९ एतेषां म
ध्ये क एषः रामभद्रलक्ष्मीसदृशोः सावष्टंभमुग्धललितैरंगैरस्माकमपि लोचनानि शीतलयति। किं भण
ध एवं भणित आगमिष्यतीति।२१ कथं सविनयं निरूपितगृष्टिवच्चनो विसर्जित ऋषिदारको इतोभि
मुखमस्त तएव सवत्सः।२२। जात इतो पितावरे इ।२३ आश्चर्यं न केवलं दरविकसान्नीलोत्पलश्यामलो
न्नतेन देहबंधेन कवलितारविंदकेसरकषायकेटकलहंसनिर्घोषघर्घरनिनाददीर्घदीर्घेण स्वरेण
रामभद्रमनुहरति ननु कठिनकमलगर्भपक्ष्मलः शरीरस्पर्शः पिता दृशा एव वत्सस्य। जात प्रेक्षामि पिताव
न्मुखं। राजर्षे किं न प्रेक्षसि निपुणं निरूप्यमाणो वत्साया वध्वा मुखचंद्रेण संवदत्येव।२४। अम्भो उन्म
त्तो भूतं इव मे हृदयं इतो सुखं विप्रलपति।२५ अस्ति ते माता स्मरसि वा तातं।२६ ततः कस्य त्वं२७ अयि जा
त कथितव्यं कथय न२८ वत्स लक्ष्मणस्य पुत्रकः आज्ञापयतीति अमृतबिंदुसुंदराणि। अक्षराणि श्र
जात भ्राता पिते अस्ति।३० ज्येष्ठ इति भणितं भवति।३१ हा वत्से मुग्धचंद्रमुखि क इदानीं ते कुसुमभरे

एवं लक्ष्मीदृत्य

स्यन्दनशिरस्येव दुर्विलासपरिणामरक्तकिन्या निपतितः ।२१। भगवति प...

ते राजर्षि ।२२। भगवति जानामि एनमलालोकयन्ती न जीवामि वातो न्यतो भूत्वा ५

दीर्घामुखं ।।२४।। इति च्छायायां चतुर्थः ।४ तत्किमिति पुनरकाण्डताण्डवितोद्दण्डकोदण्डतरङ्गि ऽ५

टाकडारं अंबरं स्फुटितं ति संवृत्तं ।१ दिष्ट्या एतेन विमलमुक्ताफलशीतलस्निग्धमसृणसोपानमां

सलेन नाथदेहस्पर्शेनानंदमंदलुलितमत्तनयनाया अंतरित एव संतापः ।३ कथमवि मो

लघूर्णमानविद्युल्लताविलाससमंडिते मेत्तमयूरकंठश्यामदेहैः आस्तीर्यते नभस्तलं जलधरैः ।४ प्र

यमेर ।५ नाथ कराषसंभ्रमोच्छ्वसकरम्भमितवस्त्रांचलो दूरत एव मधुरवचननिषिद्धयुद्धव्यापा

र एतयोरंतरे विमानचरो वर्तते इति । इति च्छायायां पंचमोंकः ।५। हा आर्यपुत्र हा कुमार लक्ष्मण एका

किनीं मंदभाग्यामशरणां अरण्ये आसन्नमसवेदनां हता श्वापदा मामभिलषंतीति सेदानीं मं

दभागिनी भागीरथ्यामात्मानं निक्षेपिष्ये ।२ दिष्ट्या दारकौ प्रसूतास्मि हा आर्यपुत्र ।३ के पुनर्युवां ।

मुंचथः । भगवति नमस्ते ।५ हा अंब ईदृशी त्वया दृष्टा ।६ हा आर्यपुत्र स्मारितास्मि ।७ यथा उ

वा मणति ।८ न यत्तु मामात्मनोंगेषु विलयं अंबा ।९ किमेताभ्यामनाथाभ्यां ।१० कथं हि मम अधन्या

याः सधन्यत्वे ।११ किमिति आबद्धकलकलं कथयति अंतरिक्षे ।१२ दिष्ट्या अत्र देवता आर्य

५० छा।
॥५५

प्रसादास्त्राति स्फुरंति॥१३ भगवत्यो कदृदानीं मेन्वयोः क्षत्रियोचितं कर्म करिष्यति॥१४ न यत्तु मामात्म
नोंगेषु विलयमेवा:॥ ओ सहिष्ये जीवलोकपरिवर्तमीदृशमनुभवितुं॥१५ समाश्वसितु आर्यपुत्रः॥
१६॥ जानास्यां मे पुत्र हताशा यादुर्वी चंद्रमार्जितुं॥१७ मस्तु जीवितास्मि॥१८ वत्स चिरंजीव इदं शापि: मे
१९ कुत्र लो पुत्रकौ मे॥२० कथं तातनः॥२१ एहि जात कुश एहि जात लव चिरस्य परिष्वजेतन नु पुनर्जन्मांतरागतां जने
नीं॥२२ भगवन् प्रणमामि॥२३॥ अम्म हे तात कुलगुरुः आर्याजनः सभर्तृका आर्या शांतादेवी सुमित्रा स
लक्ष्मणा च सुप्रसन्ना आर्यपुत्रचरणैः समं कुशलवावपि दृश्येते नन्विभरास्मि आनंदेन॥२७ इति छा
यायां सप्तमोंकः॥ इदं पुस्तकं जयकृष्णाख्य विदुषः पाटे इत्युपनामकस्य। मयैव लिखितं। शके १७८५
माघ शु ९५

[OrderDescription]
,CREATED=03.07.20 11:44
,TRANSFERRED=2020/07/03 at 11:53:16
,PAGES=48
,TYPE=STD
,NAME=S0003267
,Book Name=M-1857-UTARRAM CHARITAR TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF

FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,